CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीरघुनाथचौधारिकविरत्नेन

असमीय-भाषयाविरचिता



नवमल्लिका



गुवाहाटीमुनिकुलाश्रमवैदिकविद्यालयाध्यक्षेण

पण्डितश्रीविपिनचन्द्रगोस्वामिना

संस्कृतभाषयानूदिता

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

श्रीरघुनाथचौधारिकविरत्नेन

असमीय-भाषयाविरचिता

नवमल्लिका



गुवाहाटीमुनिकुलाश्रमवैदिकविद्यालयाध्यक्षेण

पण्डितश्रीविपिनचन्द्रगोस्वामिना

संस्कृतभाषयानूदिता

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Publisher :

Sri Gunabhiram Choudhari, B.Sc, L.L.B

E. A C., GAUHATI

P. O Gauhati (Uzanbazar)

Assam.

FIRST EDITION.



Price Rs. 2/-

Printed at Purvajyoti Press, Paneybazar, Gauhati (Assam).

Funding by IKS MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

PUBLISHER'S NOTE

Shri Raghunath Choudhary, popularly known as the 'bird poet' of Assam is one of the brightest jewals of Assamese literature. Born in 1878 at Laopara village near Gauhati, the poet had no academic career behind him. He grew amidst nature and completed his education from Nature's book.

A lifelong bachelor, this octogenerian poet has always been in the vanguard of all literary, cultural and social movements from courting imprisonment in 1921 under the 'Mahatma's call to presiding over the All India Cultural conference in 1952 at Calcutta.

Though a renowned poet, that he is also a great master of Assamese prose style is revealed from "Nava Mallika" which is a collection of nine short stories most of them written by the poet in his late seventies. It was first published in 1958.

We are deeply grateful to Pandit Sri Bipin Chandra Goswami. Veda-Vyakarana-Kavyatirtha, Principal Munikul Asram Vedic Vidyalaya, an eminent Sanskrit scholar of Assam who has very kindly come forward with this translation.

GAUHATI,
20-12-64.

Gunaviram Choudhary.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

AN OPINION

I have had the pleasure to go through the manuscript copy of the Sanskrit translation of "NAVAMALLIKA," an Assamese literary work of the reputed Assamese poet, Sri Raghunath Chaudhary, written in his ailling old age. The translation is in simple and elegant Sanskrit and does credit to its author, Sri Bipin Chandra Goswami, the Principal of Munikul Asram Vedic Vidyalaya, Gauhati. I feel the publication of the translation will be useful as providing readable literature to learners of Sanskrit and also as making an Assamese literary work known to Sanskrit-knowing people outside Assam.

Uzanbazar,
Gauhati.
28-12-64

Dibakar Goswami
M. A., B. L.
(Retired D.P.I., Assam).

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अभिमतम्

मुनिकुलाश्रमाध्यक्षेण पण्डितश्रीविपिनचन्द्रगोस्वामिना कृतः कविवरश्रीरघुनाथचौधारिदेवस्य नवमल्लिकानामकस्यानुपमगद्यकाव्यस्य संस्कृतानुवादो मया हस्तलिखितावस्थायां सम्यगवलोकितः। रघुनाथस्याननुकरणीयगद्यशैल्या भाषान्तरपरिणामो यद्यपि दुष्करस्तथापि श्रीगोस्वामिनः श्रमः सफलो जातः। मूलार्थकः सरलश्चायमनुवादः सर्वथा काव्यमर्मोविकलं प्रकाशयति। असमराज्यस्यान्यतमस्य कविश्रेष्ठस्य काव्यरसास्वादं गीर्वाणवाण्या प्रकटीकुर्वता श्रीगोस्वामिना संस्कृतविदुषां महान् उपकारः कृतः। अनुवादस्यास्य विद्वत्समाजे प्रचारबाहुल्यं कामये।

गुवाहाटी,
२७-१२-६४ ई०

श्रीरजनीकान्तदेवशर्मा
(Head of the Department of Sanskrit
Cotton College, Gauhati).

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनुवादकस्य

निवेदनम् ।

कविवरश्रीरघुनाथचौधारिकविरत्नविरचितनवमल्लिकायाः संस्कृतानुवादकरणस्य मुख्यं कारणमेतदेव यदस्या नवमल्लिकाया भारतवर्षस्य विभिन्नराज्यानां संस्कृतविद्वांसोऽपि रसास्वादं कुर्वन्त्विति ।

अस्या अनुवादो मूलानुगः सरलश्च यथा स्यात् तथा मया चेष्टा कृता । मदीया चेष्टा सफलीभूता नवेति विद्वांस एव ज्ञास्यन्ति । नवमल्लिकाया अनुवादकरणविषये मुद्रण-संशोधनकार्य्ये च 'गुवाहाटीकटनकलेजाख्याङ्गलमहाविद्यालयस्य संस्कृतविभागप्रधानाध्यापकेन श्रीरजनीकान्तशर्मणा एम्० ए०-साहित्यपुराणशास्त्रिणा महान् परिश्रमः कृतः । तदर्थं तत्समीपे मम हार्दिकीं कृतज्ञतां ज्ञापयामि । अस्या नवमल्लिकाया अनुवादस्य यदि संस्कृतविद्वत्समाजे समादरः स्यात् तर्हि तेनैव मम परिश्रमस्य सार्थक्यं भविष्यतीति—

मुनिकुलाश्रम-
वैदिकविद्यालयः ।
पो० गौहाटी, असम ।
२६-१२-६४

श्रीविपिनचन्द्रगोस्वामिनः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सूचीपत्रम्

	विषयाः	पृष्ठाङ्काः
१।	पुष्पम्	१
२।	अवहेलितं तृणम्	८
३।	चन्द्रमल्लिका	१२
४।	तन्मयता	१८
५।	प्रेम्नोजयः	२०
६।	मौनवेदना	२७
७।	जीवनाभिलाषः	३३
८।	प्रदीपाधारः प्रदीपश्च	३८
९।	गोमयापसारणपात्रम् आतपत्रञ्च	४२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नवमल्लिका

पुष्पम् ।

अयि पुष्प, त्वं प्रकृतेरपूर्वसृष्टिः, अतीवमनोरमे त्वयि स्निह्यामि, प्राणैरहं स्निह्यामि । कथं नु स्निह्यामि नैतद् वक्तुं शक्नोमि । तवोपरि मे स्पृहाहैतुकी । त्वं तिष्ठसि बहुदूरे, तथापि हृदयरनेहं सर्वेषु समानतया वितरसि । स्नेहपरिपूर्णहृदये तव विषादस्य मालिन्यं स्पल्पमपि न दृश्यते । अकिञ्चनं मां प्रति तव प्रणयो वर्तते नवेति नाहं जाने, अहन्तु तव सान्निध्यमिच्छामि । यतस्त्वं मम चिरसहचरश्चिरस्नेहपात्रञ्च ।

आसीद् यदा सृष्टेरादौ पृथिवी प्रलयपयोधिजले निमग्ना, ततो बहुयुगानन्तरं कस्मिन्नपि शुभमुहूर्त्ते प्रथमप्रकाशमानारुणेन सह द्वाभ्यां दलाभ्यामेककलिकारूपेण तवोद्भवः । चिराराध्यदयितसदितरं तव हिमशीतलहृदयमध्ये नीत्वा स्वययेव त्वं कृतार्थं मन्यसे, कृतार्थी-करोषि चानन्तजगदिदम् । त्वं स्वच्छजले प्रतिविम्बं दृष्ट्वात्मविस्मृत-म्भवसि । तव परमरमणीयरूपरसगन्धमाधुर्यैः समग्रविश्वं सम्मो-हितम् । अनाविलगन्धस्य मादकतया, विस्मयावहरूपवैचित्र्येण, सौरभ

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मण्डितसौन्दर्य्यस्य मनोहारित्वेन चमत्कारित्वेन च महाविश्वमण्डलं तमो विभिद्य समुदभासते । निस्यन्द्य प्रवहमानमन्दाकिन्या अमृत-धारेव, कीदशी स्फुरत्प्रभामयी कमनीया कान्तिः ! तवा-निन्द्यसुन्दररूपलावण्याभ्यां दिग्वलयं व्याप्य निखिलविश्वम् आनन्द-मुखरम् । वैचित्र्यपूर्णस्य मानवजगतो मानसिकदुर्बलताया असंयत-चित्तस्य व्याकुलतायाश्च नियमितचलनार्थं तव दीप्तेर्महीयस्या शक्त्या यद् दिव्यज्ञानं दत्तम्, तदचिन्त्यम् । त्वं मनोहरवनोपवनानि श्वापद-सङ्कुलानि दुर्गममहारण्यानि च सुशोभितानि कृत्वा जीवानां मनःसु वर्द्धयसे परमानन्दम् । त्वं पृथिव्या अन्तिमप्रान्तस्थितं निर्जनं मेरूमण्डलं समुदभासितं कृत्वा प्रकृतेर्महिमानं प्रथयसि । भयङ्करजल-चरजीवसङ्कुल-अतलजलधिगर्भमालोकितं कृत्वा परां निर्वृतिं लभसे तरुतृणलतागुल्मवर्ज्जिते महाश्मशानसदृशे विशालमरुक्षेत्रेऽपि तवात्म-प्रकाशो दृश्यते । सान्त्वनाशान्तिवारिपातेन शरीराणि शीतलयितुं दिग्भ्रान्तान् पान्थान् आकुलाह्वानसङ्केतं ज्ञापयसि । दूरधिगम्यश्याम-तरुच्छायावृतमानससरोवरे शुभ्रशतदलरूपेण प्रस्फुटितं कृत्वा गाम्भीर्य्य-पूर्णं सिद्धाश्रमं दिव्यगन्धेन दिव्यज्योतिषा च परिशोभयसे । महाकाशस्य नभोरेणुभिः सह तव सुवासितगन्धरेणवः सम्मिलिताः सन्त एकस्या नूतनसृष्टेरपूर्वश्रियं धारयन्ति । गगनविहारिणो जीवाश्चानन्दा-वेगेनोद्भ्रान्ता उन्मत्ताश्च दरीदृश्यन्ते । सुषमामण्डितैः सुप्रीतिगन्ध-मयैर्विपुलैश्वर्य्यसम्भारैर्नातिशीतोष्णमण्डलभूभागोऽधिकसमृद्धिशाली भवति । पृथिव्यामेतादृशमेकमपि शून्यं स्थानं नास्ति यत्र तव हृदयपरिप्लावी हास्यनिर्झरो न स्यन्दते । इदं सौरभेन भूमण्डलमालोकितं, तव

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गौरवेण जगदिदं गौरवान्वितञ्च ।

न ज्ञायते कीदृशं महदुद्देश्यं साधयितुं तवेदृशमहैतुकं प्रेम । हे कुसुम, त्वं व्यापकमसि, त्वं सर्वत्र विराजसे च धीरवसन्त–समीरणमृदुहिल्लोलेन सुकोमलदलानां नृत्यशडया सावलीलगत्या च तव कीदगपूर्व्वो लयलासः ? लीलायितच्छन्दसां तालेन सह लतिका–वेष्टितनवपल्लवितततरुशाखाः स्रष्टारमभिवाद्य तस्य महिमानं कीर्त्तयित्वा धन्या मन्यन्ते गन्धव्याकुलविहङ्गमसमूहः पुलकाकुललितच्छन्दसा तव शुभागमनसूचकजयगीत्या दिङ्मण्डलं मुखरितं करोति । प्रियतम ! तव मनोमयप्राणमय–अनिर्वचनीयरूपसागरे को न निमज्जति ? तवामृतमाधुरीं पीत्वा हृदये केन वा सान्त्वना न लभ्यते ? त्वं चिरानन्दमयी चिरकल्याणमयी चिरहास्यमयी दिव्याभरणभूषिता शोभनालङ्कारशोभिता च प्रकृतेरतिसमादरयोग्या मानसकन्या । तवाभ्युत्थानेन सह पृथिव्या नवोन्मेषः । सृष्टपदार्थमध्ये त्वं सर्वश्रेष्ठं शोभनीयं वस्तु । त्वामादायैव प्रकृतेर्गौरवम् ।

ज्योत्स्नाप्लावितानां क्षुद्राणां दलानां सुकोमलातिक्षुद्रहृदयस्य मध्ये केशरतुलिकथातीतयुगानां बहूत्थानपतनाम् इतिहासः, रूपकुमारस्या-लौकिकमाख्यानं, गुप्तप्रणयकथा, भग्नहृदयस्य विरहव्यथा, व्यर्थप्रेमिकस्यात्म-निवेदनम्, आशाया निराशायाश्च मर्म्मस्पर्शिनी वाणी, हास्यक्रन्दनयो–र्मिलनवियोगयोश्च स्मृतिः, चित्तविनोदरूपकस्याभिनयलीलागाथेत्यादयः कथाः सुवर्णाक्षरैरुपनिबद्धाः सन्ति । कुहेलिकामयजीवनस्य प्रहेलिका सम्पूर्णं रहस्यावृता दुर्बोध्या च । अयस्कान्तवदाकर्षणशक्त्या कियतीं प्राणशक्तिं केन्द्रीभूतां करोषि ? पवनप्रवाहसञ्चारितवक्षःस्थल

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सौरभेण तारकितं नैशं जगत् प्राणवत् कृत्वा प्रकाशयसि । ज्योस्ना-निशायामपूर्वरूपलावण्याभ्यां मुग्धासंख्यनक्षत्रराजिस्तुभ्यं प्रीतिसम्भाषणं ज्ञापयित्वात्मतृप्तिं लभते । अव्यक्तकलनिनादिनां विहङ्गमसमूहानां नवनवगीतिच्छन्दोभिः पुष्पितवनस्पतयः पुलकिता इव भान्ति । मुकुलित-नवपल्लवैः प्रकृतिः सुसज्जिता सती विराजते च । चुम्बनाभिलाषिणो मधुमदिरामत्तभ्रमरा कस्माच्चित् स्थानादुड्डीय समागत्योन्मुक्तहृदये चुम्बनं कृत्वा पुनः किमप्यनिर्दिष्टस्थानं प्रति गताः । पुष्पवनं मोहाच्छन्नमिवाभूत् ।

प्रकृतिराज्यस्यषड्ऋतव एकं पूर्णाङ्गं मिलनान्तनाटकम् ! प्रत्यतुं प्राणिरङ्गशालाया अङ्कगर्भाङ्कयोर्लोभनीयदृश्यानि मर्म्मपीड़ित-लोकान् किमप्यज्ञातराज्यं नयन्ति । प्रियाविरहेण कातरो हताशः प्रेमिकोऽञ्जलिपूर्णतया त्वां गृहीत्वा दौत्यदेशेन दयितायाः समीप-गमनाय मेघं संप्रार्थ्य प्रोवाच त्वं तत्र गत्वा द्रक्ष्यसि—

हस्ते लीलाकमलमलके बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।
चूड़ापाशे नवकुरुवकं चारुकर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ।
यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पाः
हंसश्रेणी रचितरसना नित्यपद्मा नलिन्यः ॥

—कालिदासः ।

पुष्पाणां सौन्दर्य्यमाधुर्य्याः कामिन्या अङ्गसौष्ठवस्य चेति द्वयोरेव कोमलताविषये कविना सुष्ठु वर्णनं कृतम्

Digitized by eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शिरसि वकुलमालां मालतीभिः समेतां
विकसितवनपुष्पैर्यूथिकाकुट्मलैश्च ।
विकचनवकदम्बः कर्णपूरं वधूनां
रचयति जलदौघः कान्तवत् काल एषः ।
विकचकमलवक्त्रा फुल्लनीलोत्पलाक्षी
विकशितनवकाशश्वेतवासो वसाना
कुमुदरुचिरहासा कामिनीवोन्मदेयं
प्रतिदिशतु शरद्वश्चेतसः प्रीतिमग्र्याम् ।
करेषु योग्यं नवकर्णिकारः
चलेषु नीलेष्वलकेष्वशोकः ।
पुष्पञ्च फुल्लं नवमल्लिकायाः
प्रयाति कान्तिं प्रमदाजनस्य ॥

हे प्रसून, त्वं प्रेम, दया, क्षमा, शान्तिः स्नेहश्चेतिपञ्चदलस्थित-सार्वभौमशक्त्या दिङ्मण्डलं सम्मोहयितुं समर्थम्भवसि । तव लावण्यमयदलान्येतादृशानि सुकोमलानि यत् कुमारीणामङ्गुलिस्पर्शेन कदाचिद्दुःखं प्राप्नोषि ग्लायसि वेति बुद्ध्या कोमलाङ्ग्यो नार्य्यस्तानि तव दलानि चेतुं सङ्कोचं कुर्वन्ति । कोमलपदार्थः कोमलं न हन्ति, अपि तु कोमलस्पर्शसुखलाभेन शरीरं रोमाञ्चितम्भवति । ततो हि रमणीनां रमणीयाङ्गभूषणस्य पुष्पमेव प्रधानमुपादानम्, पुष्पजातद्रव्य-सम्भारा एव प्रसाधनस्वरूपाश्च । हे पुष्प, तव रूपस्य गुणस्य चापारो महिमा ! तेजस्विता ते धारणातीता । तवापूर्ववेशस्य स्वर्गोयाभिनयलीलां दृष्ट्वा जनास्तन्मया भवन्ति । त्वं वेदनाक्लिष्ट-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जीवनस्य सञ्जीवनी सुधा, दिगन्तव्यापिनी विश्वविजयिनी रूपकुहकखेला च। त्वं देववाञ्छितमसि। देवास्त्वां सद्योजातरूपेण पूजाया वेद्यां यदि लभन्ते तर्हि ते कीदृशाः सन्तुष्टा भवन्ति तद्वक्तुं न शक्नोमि।

कस्मिन्नपि क्षणे देवराज-इन्द्रस्य विलासभवने सुन्दर्य्या अप्सरसो वेशं गृहीत्वा त्वया नृत्यैर्नयनकटाक्षैश्च कामपि देवतां सम्मोहयितुमपचेष्टाक्रियत। ततो नृत्येषु तालभङ्गदोषतः शापभ्रष्टं सन्मर्त्ये मनोहरपुष्परूपेणावतीर्णमसि। सौन्दर्यसुषमया मोहितं कस्यापि तापसकुमारस्य वरं लब्धा नर्त्तकीरूपेण देवतानां मानसं त्वं हृतवद्वा। तस्मादेव भूलोकस्वर्लोकप्रभृतिषु सर्वेषु लोकेषु तव पूर्णविकाशः। वराङ्गणाः प्रियजनं हृदयेन समालिङ्गितुं त्वां वरणपात्रे सज्जीकृत्य कां देवतां समाराधितवत्यस्तन्न जाने। त्वां गृहीत्वा का वा सुन्दरी युवतिरलके मस्तकमणिश्रेणीं ग्रथ्नाति ? तथा वैजयन्तीमालारूपेण कण्ठे परिधाय भुवनमोहिनी अप्सरा भवितुं कस्याश्चिच्च महत्युत्कण्ठा महती व्याकुलता च दृश्यते। तासामुद्विग्नताया मध्य एव जीवनस्य निरवच्छिन्ना चञ्चला गतिः। हे कुसुम ! त्वं प्रचुरसम्पदोऽधिकारि च। विलासभोगिनो जनास्तव हृदयस्य माधुरसमाहृत्य विलासयोग्यान् बहून् सुगन्धिद्रव्यसम्भारान् संगृह्यात्मतृप्तिं लभन्ते। तथापि त्वम् अक्षयमव्ययञ्च। त्वयाकुण्ठभावेन सर्वेभ्यो दानं क्रियते, प्रतिदानन्तु कस्मादपि नाकांक्ष्यते च।

हे प्रियदर्शने ? दुःखदैन्यादिनानायन्त्रणापरिपूर्णसंसारमरुभूमेस्त्वमेव निर्मल उत्सः, शान्तिपूतधारा च। तवान्तरिकस्नेहविगलितामृतधारां निपीय कस्य प्राणाः सुशीतला न भवन्ति ? त्वं कविप्रिया, कविध्यानसामग्री च। त्वं काव्यमयजगतश्चिन्ताया मुक्तधारा,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वमानन्दमयी चिरकल्याणमयी शक्तिरूपा च। सर्वत्र तव पूर्णविकाशः। विश्वस्य सर्वत्र तव महासमारोहो दृश्यते। पूर्णतायास्त्वं महाभियानञ्च। स्रष्टुः कीदृगपरिसीमः स्नेहः ? त्वं सत्यमसि, जगदपि च सत्यम्, त्वमसि जगदस्ति, जगदस्ति त्वमसि च। त्वं जगच्चैतद्वयमेवैकसूत्रेण ग्रथितम्। तवाकृत्रिमप्रेम्नो बन्धनेन जगत आत्मनां परस्परमेलनम्। त्वं परमानन्दस्य विचित्रमालेख्यमसि। त्वं सत्यशिवसुन्दराणां सजीवं रूपम् त्वं वर्णनायाः कल्पनायाश्चातीतासि। त्वमतीन्द्रिय-जगतो जपमाला, साधकस्य साधना, अन्धकारनिशाया उल्का। तव विश्वमोहनरूपेण सुघ्राणेन च को वा न विमुह्यति ? त्वं प्रकृते दुर्जयशक्तिः। अतो हे विश्ववरेण्ये, विश्वाराध्ये, तव त्यागस्य महिम्ना दानस्य गरिम्ना चाहं विस्मयान्वितो भवामि, भावेन व्याकुलोऽस्मि च त्वं क्षुद्रादपि क्षुद्रा महतो महीयसीति यथा तथा भवसि वा। हे अतिशोभने, त्वं मम चिराराध्या, चिरपूज्या, चिरनमस्या शक्ति-रूपासि। अतस्त्वं ममान्तरस्यान्तरतमप्रदेशस्यान्धकारकोणे गोप्य-स्यमन्तकमणिरसि। असीमव्यर्थजीवनस्य छायाया आलोकस्य चान्तर्धानक्रीड़या मायाशलाकायाः स्निग्धस्पर्शेन च मम रुद्धद्वारं स्वत एवोद्घातितम्, दिगन्तोऽपि ज्योतिष्मानजायत च।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अवहेलितं तृणम्

अमुष्मिन् राजमार्गपार्श्वे जीवजगतः समादरविहीनमेकं तृणम् अस्ति। तत् तृणं नहि तादृशं रमणीयम्, अनुकूलकालयोगात्तु सजीवं भवति। तत्समीपे बहुविधानि क्षुद्राणि ह्रस्वानि च तृणानि सन्ति। तान्यपि क्षिप्रमेव सम्यग् वर्द्धन्ते। समीरणयोगात् स्वाङ्गं सुसुखम् इतस्ततः सञ्चालयत् सर्वत्रानन्दस्रोतांसि प्रवाहयन्ति। तानि कस्याप्युपकारं कुर्वन्ति हि। तस्य तु जीवनं व्यर्थम्। कथमेतादृशं जातमिति तेन न ज्ञायते। मनसि दुःखमायाति। रहस्यमयं जगत् प्रति तन्निर्निमेषं पश्यत् तिष्ठति। तूष्णीमश्रुबिन्दून् मुञ्चति। हृदयाद् दीर्घनिश्वासो निःसरति च। एकदा वसन्तस्य कस्मिन्नपि प्रत्यूषे प्रातःकालस्य रक्तिमं नभो विराजते स्म। विश्वं नूतनसृष्टेः सूचनां दातुं सुसज्जितम्। बालतृणस्य तैलपिच्छिलकोमलहृदये सुवर्णवर्णाभाः कतिपयहिम-बिन्दवो मृदुवायुसञ्चालनेन चञ्चला अभवन्। शनैः शनैः ज्योति-षोऽभिमुखं भूत्वा तत् स्रष्टुश्चरणप्रान्तेऽर्घ्यं दत्त्वा हार्दिकमभिवादनं ज्ञापितवत्। शीर्षोपरि तस्य कानिचिद्रिद्राभकुसुमानि। रक्तनीलाभनभो-मण्डलं प्रति तन्निर्निमेषं पश्यत् स्थितवत्।

प्रभात एव मधुकरा अज्ञातस्थाने पुष्पितहरिद्राभवनकार्पास-पुष्पवृक्षान् मधु समाहृत्य गुञ्जन्तः कुत्रचिद् गताः। विविधानि सुगन्धि-पुष्पाणि जगदिदं सुशोभितमकुर्वन्। रक्तेन सूक्ष्मेण च पट्टोत्तरीयेण समग्रशरीरं समाच्छाद्य रमणीयमधुपपत्नी गुटिमालीपुष्पस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मधुकणं निपीय कमप्यज्ञातदेशं गतः। कोऽपि तत्समीपं नागतवान् नवा वारमेकमपि तत् प्रति कटाक्षपातकरोच्च। अतस्तस्य मनोऽतीव विषण्णम्। हृदयस्य स्नेहो न केनापि संविभक्तः। मनसि तस्यातीव दुःखम्। मनोभावो मनस्येव लीनः। पश्यतस्तस्य सहसैव समग्रं जगन्मुखरितमभूत्। यानवाहनानां घर्घरध्वनिः, नानाजीवानां पादशब्दाः चतुर्दिक्षु कर्णविदारका रवाः, कुत्सितसुरस्य विकटः कोलाहलः, बालकानां बालिकानाञ्च चीत्कारः हास्यध्वनिश्च। मन्ये क्षणेनैव बालका हस्ते वेत्रं गृहीत्वा तृणानां क्षुद्रपत्राणि वेत्राघातेन छिन्नभिन्नानि करिष्यन्ति, नो चेत् कस्यापि पदनिक्षेपेण चक्राणामधः पतित्वा वा भूमौ लिप्तानि भविष्यन्ति। तच्चकितभूत्। हृदयमपि तस्य व्याकुलमभवच्च। सम्भाव्यमानविपदाशङ्कया हृदयं किञ्चिदाकोड़ितम्। तन्निरुपायमभूत्। कियत्समयान्तरं रथचक्रेण तस्य सुकोमलदलानि विध्वस्तानि। आसन्नवशिष्टानि स्वल्पान्येव स्तम्बलग्नानि दलानि, तान्यपि धूलिधूसरितान्यभवन्। यन्त्रणया कण्ठगतप्राणं सत् तत् कथमपि शरीरम् उत्क्षोल्योदतिष्ठत्। तत् कथं न मृतम्; जीवितेन वा किं प्रयोजनम्? तेन कस्य किमुपकृतम्भवेत्? तथापि तस्य मरणेच्छा न भवति। अन्यगुल्मवत् तदपि महता कष्टेन कथमपि जीवितुमिच्छति। जीवनधारणं तस्य जीवनाभिलाषः। तदपि दुर्वारवासनां हृदये संरुध्य सर्वेषामेवावहेलितं जीवनं गृहीत्वा कण्टकाकीर्णे संसारेऽस्मिन् जीवितुम् आगच्छति। जीवित्वापि तत् संसारस्य तरङ्गं वायुं प्रस्तरं गर्जनम्, अत्याचारम् अनाचारञ्च हृदये धारयितुं शक्नोति। तज्जानाति यत् कोऽपि तत् प्रति न स्नेहशीलः। तत् स्नेहपरिपूर्णमृदुवाक्येन सान्त्वयितुं कोऽपि नागच्छति। दुःखजर्जरित-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कठिनं तच्छरीरं कोऽपि सुकोमलहस्तेन स्पष्टुञ्च नायातोति। तथापि तज्जीवनं धारयिष्यति। जीवनधारणमेव तस्य जीवनस्य सार्थक्यम्। तस्यापि जीवने क्षुधापिपासे स्तः। अन्तरं पिष्ट्वा वेदनाया द्राक्षारसं पीत्वा शरीरं प्यायितुं वर्त्तते तस्यापीच्छा। मनोरमसंसारचित्रशालाया रञ्जितचित्राणि दृष्ट्वा तदपि परमां तृप्तिं लब्धुमाशास्ते। तत् स्वप्नपुर्य्याः कल्पनाजाल ग्रथ्नाति अपितु तच्छिन्नम्भवति। पुनरपि ग्रथितुं चेष्टते; तदा हि सूत्राधारस्य सूत्रं निःशेषितं भवति च। स्वप्नो नश्यति चकितम्, उत्तिष्ठति च। विचिन्त्य दिशं न लभते। तच्चिन्तयतितस्य जीवित-कङ्कालमभिशापमात्रम्।

तदङ्गसंलग्नदूर्वादलस्य तथा गोमापुष्पगुल्मस्यापि जन्मनः प्रयोजनमस्ति तेषामपि कस्याश्चिद् देवतायाः पूजायां प्रयोजनं विद्यते कस्याश्चिद् देवताया भोगे वा। तस्य पुनः कुत्रापि प्रयोजनं न विद्यते। तेन देवतापि न लब्धा न वा भक्तोऽपि लब्धः। तृणजगतस्तद्गलग्रह-स्वरूपम्। तस्य जीवनस्य सार्थकता कुत्र, तेन न ज्ञायते। तेन तस्याभिशप्तजीवनस्य पुनरपि कियत्कालपर्य्यन्तं भारवहनं करिष्यते। तद् बह्वी आशा आकाङ्क्षाश्च हृदये कृत्वा समागतम्। अद्य तु तस्य निरर्थकजीवनं कस्मिन्नपि न प्रयुक्तम्। निष्ठुरं सत्यमेतज् ज्ञात्वापि सहसा तेन पृथिव्या अस्या गन्तुं नेष्यते। तेन चिन्त्यते, यद्मुष्मिन् विस्तृतसरोमध्ये भासमाना वारिपर्णिकापि (पुनिरपि) मत्सदृशीति। वायुवेगेन सा कदाचिदस्मिन् पारे कदाचिद् वा परपारे गच्छति। व्याकुला सती सूत्रचक्रवत् परिभ्रमति। कुत्रापि स्थितिर्नास्ति। कदाचि-त्तरङ्गास्फालनेन विषमेटेकामपि पतितां [illegible] प्राणवेदनां ज्ञापयित्वा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सा वारिपर्णिका विषमेटेकामुक्तवती-भो प्रियमित्र, अहमपि त्वत्सदृशो यायावरी। तव निष्ठुरनिष्पेषणात् माम् उद्धर, एकान्तस्थाने कुत्रापि विश्रामं लब्धु मिच्छामि। आवाम् एकस्या एव गोष्ठ्या भवावः। सुचिरं कालं यावत् पददलितरूपेण मां संरक्ष्य तव को लाभः? वारिपर्णिकायाः कातरोक्तिर्विषमेटेकाकर्णे न प्रविष्टा। मन्ये वारिपर्णिकापि शीघ्रमेव जले नष्टा भविष्यतीति। तस्यापि समाना दशा। तस्य लाञ्छितस्य निष्पेषितस्य च जीवनस्य शक्तिः क्रमशः क्षीणा जायते अद्य निर्यातितजीवनस्य बहुकथास्तस्य स्मृतिपटमागच्छन्ति। तस्य क्षणभङ्गुरजीवनस्य मनोहरं रूपं वसन्तकाल एव। तन्मरणदेवतामालिङ्गितुमभिलषदास्ते। अस्मिन्नेव समये जातिचन्दनवृक्षादेकोऽज्ञातपक्षी पुच्छं सञ्चालयन्नव्यक्तशब्दं कृत्वोड्डीय गतः। शून्ये समुत्पतन् नीरवः पक्षी, 'भवति, मां नय' इत्युक्त्वा करुणसुरेण सह शून्ये मिलितः। समीपस्थपलाशवृक्षकोटरे समुत्पन्नैरलसैः रोहमालापुष्पैरुपहासं कृत्वा नीरसं हास्यं कृतम्। सूर्य्यास्तगमनसमय एव जीर्णं पत्रद्वयं परस्परं संयोज्योपरि शिर उत्तोल्य च तत् कमप्युद्दिश्य वेदनापरिपूर्णान्तिमपात्रमधोमुखं कृत्वा स्थितवत्। निशायां करकावृष्टिपातेन तस्य हरिद्राभपुष्पाणि परिम्लानत्वमुपगतानि। पत्राणि च परिम्लाय भूमौ निपतितानि सन्ति। भग्नाग्रपत्रहीनस्तम्बो हि दण्डायमनो विरूपं कङ्कालरूपं धारयन् तिष्ठति। अशरीर्य्यात्मापि गीतपंक्तिमेकाव्यक्तां प्रगाय वायुना सह मिलितः। तेनोक्तम्—

विफलं जीवनं मे हि विफला साधनापि च।
जीवनेऽस्मिन् मया लब्धाः सहस्रवेदनास्तु वै॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चन्द्रमल्लिका

चैत्रमासस्य दिनानि विगतप्रायाणि अभ्रहीनं नभः। लेशलाञ्छनस्यापि मेघस्य कुत्रापि दर्शनं न जायते। प्रकृतिराज्ये यौवनदृप्तऋतुराजस्य पूर्णः प्रभावः। जलानि स्थलान्यन्तरीक्षञ्च व्याप्य वृक्षा लतास्तृणवनराजयश्च जीर्णाभरणानि परित्यज्य नवनवपल्लवपुष्पाणां सज्जां परिधाय तोरणसम्मुखे वरणपात्रं सज्जीकृत्य च स्वागतं ज्ञापयितुं सर्वे प्रस्तुता भवन्ति। दिनकरोऽस्तं गतः। पश्चिमाया दिशो रक्तिमनभसो हिरण्मयसिंहासने दिनान्तरविः क्षणं स्थित्वा महार्घरत्नखचितमालां परिधाय च दिगन्ते विलीनोऽभूत्। समग्रं नभः पिङ्गलाभामधारयत्। वसन्तस्यागमनेन प्रकृतिजातवस्तून्यपूर्वशोभां धारयन्ति। उदयाचलात् पूर्णचन्द्रः काञ्चनाभं रश्मिजालमूर्ध्वं विकीर्यं भूमण्डलं मन्दं मन्दमवतार। ससम्भ्रमं सन्ध्याराज्ञी तड़ितो हारमेकं चन्द्रस्य कण्ठेऽर्पितवती। लक्षशः सुवर्णबाणैर्निर्भिद्यान्धतमोरूपं वृत्रं सञ्जहार च। नीरन्ध्रं नभः काञ्चनाभज्योत्स्नया समुद्भासितम्। दूरस्थितगिरिगह्वरनितम्बान् नान्दीगायकः 'परघुमानामक' पक्षी नान्दीस्तवगीतेनाभिवादनं ज्ञापितवान्। कोकिलकेतकीसारसप्रभृतयश्चारणवर्गा निखिलविश्वस्य दिगन्तं व्याप्य शान्तेर्मुक्तधारां प्रवाहयन्ति स्म। राजहंससमूहाः कलकलनिनादैर्दिशो मुखराः कृत्वा मानससरोवराय गतिमकुर्वन्। यूथभ्रष्टा बलाकापङ्क्तिरपि दिग्भ्रान्ता सती कस्मिन्नप्यसीमसीमान्ते विलीना। शून्ये तारकापुञ्जस्य 'लूकाभाकुः' (अन्तर्धानरूपबालक्रीडा) श्रूयते च प्रचीनज्योतिःखद्योत-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मालाया मरीचिका सहसैव नष्टा। नैशं नीलं नभः सुधाधवलितरूपं प्राप। मर्त्यभुवनेऽपि ज्योत्स्नायाः कोमलस्पर्शेन पुलकं जागर्त्ति स्म। वनोपवनानां पुष्पिततरुराजिभिः पुष्पितलताकुञ्जैर्नवतृणाङ्कुरदलैश्च विपुलपुष्पसम्भारैरात्मनिवेदनं ज्ञापितम्। एतादृश्यां ज्योत्स्नाप्लावितायां निशायां रूपरसगन्धशब्दस्पर्शादीन्द्रियग्राह्यपञ्चेन्द्रियविषयसमावेशेन चराचरं विश्वं मुग्धम्। शान्तिमोहमदिरया विशालविश्वं तन्द्राविष्टं भूत्वा निश्चेष्टमभूत्। देवपुर्य्या अप्सरसां गीतिच्छन्दःसुरतरङ्गैः पद्मवनेऽपि जलतरङ्गध्वनिरभूत्। सरला कुमुदिनी प्राणप्रियकुमुदबान्धवस्य चरणे समर्प्यात्मानं धन्याभूत्। लोकसमाजेऽनादृता स्वकीयोत्साहेन स्वयमेव प्रस्फुटिता स्वत एव शनैः शनैः परिम्लानत्वमुपगता भृशं दुःखिता च पुष्पिता 'कलमौ'नामकलता नौकां परिचालयन्तीव परिश्रान्ता सती निशाकरसमीपमागता। रिक्तहस्ताभ्यां प्रणामं ज्ञापयित्वा कृतार्था जाता च। श्यामकुञ्जच्छायापरिवृतरङ्गमञ्चात् सुन्दर्य्याः केतक्या दलान्यवगुण्ठनं परित्यज्य कटाक्षपातमकुर्वन्। कदलीपुष्पसदृशे सुकोमलशरीरे कुसुम्भारुणवस्त्रेण कुङ्कुमरञ्जितदेवाङ्गभूषणसूक्ष्मवाससा च वक्षःस्थलमावृत्य मधुविहीनगन्धफलगुरेणून् प्रियतमशरीरे विकीर्य्यात्मप्रसादमलभत। अदो दूरस्थितजनसमागमहीनसंकतिन्या 'झाँउवन'-क्षेत्रस्य पार्श्वे स्वत एव भूमिं निर्भिद्य समुत्पन्नेन रूपगन्धविहीनेन 'बालिबाबरि'नामकपुष्पसमूहेन रातुलचरणेऽञ्जलिप्रदानं कृतम्। न जाने, कया महत्याशया स्नेहशीलस्य प्रियजनस्य स्नेहाभिलाषी सन् केनाप्यलक्षित एव 'झाँउवनक्षेत्रस्य' प्रान्तदेशे निलीनोऽभूत्।

जीवजगन्निस्तब्धम्। निशाया नीरवतां विजित्य कुतोऽप्यनाहतानन्द-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुर एको गगनं विदीर्य्य ध्वनितोऽभूत् । समीरणमृदुहिल्लोलेन दिग्वलयो महिममण्डितो जातः । धीरगति समालम्ब्य पूर्णचन्द्रो हिरण्मयेन ज्योतिषा विश्वभुवनं शुशोभितमकरोत् । सर्वे जना हृष्टचित्ताः ससम्भ्रमाश्च एतादृश्यां सौरभमय्यां गौरवमय्याञ्च ज्योत्स्नापरिपूरितायां निशायाम् अनिन्द्यसुन्दरी विरहकातरा चन्द्रमल्लिका हि केवलमभिमानवती रोषगृहे समासीना । चित्तमतीव निरानन्दम् । एतादृशसमये लताकुञ्जाद् आनन्दविह्वला विचित्रवर्णा माधमालती, सुदीर्घवेणीम् उन्मुच्य चन्द्रमल्लिकायाः समीपमागत्योवाच—अयि सखि, उत्तिष्ठ, पश्य, अद्य ज्योत्स्नामयी निशा दिक्चक्रवालं व्याप्य विश्वविमोहनरूपिणी प्रतिभाति । कलकण्ठविहङ्गमकुलस्य गीतिच्छन्दस्तरङ्गेन तरङ्गिता च । धीरसमीरणस्य हिल्लोलेन नवकिशलयसमूहो हिल्लोलितः । एतादृशे मनोरमे शुभक्षणे त्वं कथं विषण्णवदना वर्त्तसे ? पूर्णचन्द्रश्च तव शीर्षदेशे वर्त्तते । चन्द्रमल्लिकया सविषादमुक्तम्-सखि, कोऽपि मम हृदयस्य रुद्धद्वारे सङ्केतध्वनिं कृत्वा दूरं गतः । अनुमानेन मया ज्ञात एव सः । यतः—

कान्तो यास्यति दूरदेशमिति मे चिन्ता परं जायते
लोकानन्दकरो हि चन्द्रवदने वैरायते चन्द्रमाः ।
किञ्चायं वितनोति कोकिलकलालापविलापोदयं
प्राणानेव हरन्ति हन्त नितरामारामसमन्दानिलाः ।
—कालिदासः ।

चन्द्रमल्लिकायाः कातरां वाणीं श्रुत्वा सुधाकरो मन्दं मन्दं वनवीथिकायाश्छायाच्छिद्रेण दृक्पातमकरोत् । अपावृतानि मनोरम-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुष्पदलानि । चन्द्रमल्लिका सप्तवर्णरञ्जितदीप्तकोमल हृदयस्य गन्धरेणून् मधुनिर्य्यासञ्च प्राणकान्तस्य चरणोर्ध्वरूपेण समर्प्य कृताञ्जलि-बद्धा सती वक्तुमारेभे—हे प्रियदर्शन, त्वं मम जीवनसर्वस्वम् चिराराध्यश्च । अतो मर्म्महतव्यर्थजीवनस्यात्मकथां निवेदयितुमिच्छामि । प्रियतम, त्वं सुस्थिरः सन् शृणु, मुहूर्त्तमात्रमेव मया सह तव मिलनम् । तव स्नेहेन्द्रजालशलाकायाः कोमलस्पर्शेन नवजीवनं मया लब्धम् । अहमतीव हतभागा । संसारस्य सर्वैरुपेक्षिता परित्यक्ता च । दिन-विकसिनीनां मत्सहचरकुसुमकुमारीणां समाजेष्वपि मम नास्ति स्थानम् । मधुपायिपक्षिणोऽपि स्नेहार्थिनो मे सान्निध्यं नागच्छन्ति । सोदर-प्रतिमा मधुमल्लिका अपि सादरवाक्येन मां प्रबोधयितुं नायान्ति । देवमन्दिरे मे प्रवेशाधिकारो नास्तीति हेतोः पूजका वारमेकमपि मां प्रति दृष्टिपातं न कुर्वन्ति । एतादृशमवहेलितं जीवनं धारयन्त्या मया जन्मलाभः कृतः । दुःखिन्या ममावहेलितजीवनस्यासहनीययन्त्रणाकथा हृदयमुन्मुच्य त्वदग्रे मया निवेदिता ।

अद्यास्मिन् माहेन्द्रक्षणे तुभ्यं मया मदीयं सर्व्वस्वं समर्पितम्। त्वं मां परिष्वज्य सादरं गृहाण । मया मुक्तिर्न काम्यते ; केवलं तव कुसुमसुकोमलेविशालवक्षसि किञ्चिद् विश्रामस्थानमाशास्यते । उत्तरं प्रतीक्षमाणा चन्द्रमल्लिका सुधाकरस्य मुखकमलमनिमेषदृष्ट्या पश्यन्त्यतिष्ठत् । सुधाकरस्तु किञ्चिदूर्द्धं गत्वा चन्द्रमल्लिकामवदत्-सुवदने, कस्मिन्नपि शुभे क्षणे तव जन्म । तव निरुपमरूपसौन्दर्य्ययोः प्रेमपरिमलेन विभ्रान्तं जगदिदम् । प्रेयसि, तव जीवनमतीव पवित्रम्, त्वमनाघ्राता, लुब्धमधुकरोऽपि मधुग्रहणेन ते पवित्रतां नाशयितुं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

छिद्रमन्विष्यन्नपि न लभते। हे परमसुन्दरि, त्वं शान्तेर्मूर्तंप्रतीकम्। तव दलानां कोमलतया शीतलतया लावण्येन चापूर्वसौन्दर्य्यसुषमायाः सृष्टिः कृता। तव रूपे न वर्त्तते उग्रता, वर्त्तते च सुशीलता, न विद्यते मादकता, विद्यते च स्निग्धता, नह्यस्ति च अहमिका, अस्ति हि ते नम्रता,। त्वं देववाञ्छितासि। यद्यपि मर्त्ये तव नास्ति यथेष्ट-समादरो देवलोके तु वर्त्तत एव। विश्वमन्दिरस्य पूजाया वेद्यां तदर्थं श्रेष्ठं स्थानं निरूपितमस्ति। त्वमहश्चोभावेव प्रकृतेरविच्छिन्नांशौ। प्रियतमे, त्वं जानीहि मम जीवनयात्रायाः पन्था अतीव दुर्गम इति। अर्द्धालोकार्द्धच्छाययो र्मध्येनैव मे जीवनमतिवाहितम्भवति। ग्रहोप-ग्रहानामाघातप्रतिघातयोर्निष्ठुरनिष्पेषणेन मे शरीरं जर्ज्जरितम्। रुग्नं शरीरमेकं गृहीत्ववाहमावहमान कालत. कठोरं कर्त्तव्यकर्म्म सम्पादयन्नस्मि। त्वं दूरतो मामतिसुन्दरं पश्यसि, वेदनापरिपूरितहृदयेऽस्मिन् कियद्दुःखं वर्त्तते, तत्तु कथं बुध्यसे? मम नवयौवनस्य पूर्णपरिवेश एकामेव शुभयामिनीं व्याप्य तिष्ठति। यौवनस्य प्रदीप्तोन्मादना क्रमशः क्षीयमाणा जाता। अतः कस्यांश्चिन् महानिशायामात्मविलोपो घटिष्यते तथापि नाहं विचलितः क्षान्तश्च भवामि। अविच्छिन्नगत्या करणीयं कार्य्यं सम्पा-दयनस्मि। हे प्रियतमे, त्वमपि ममानुगामिनी भव। कर्त्तव्यपालनेव हि सनातनो धर्म्मः। कर्म्ममयजीवने न विद्यते विश्रामावकाशः। वास्ति गतिशीले बद्धनशीले च जीवनेऽवकाशः, न वर्त्तते चावसादः। कर्म्मैव जीवनस्य सुधा। प्रेम्नि शक्तौ च सृष्टेर्विकाशः। श्रान्तानां भ्रान्तानां कर्म्मव्यस्तजीवानामन्तःकरणदुष्टप्रवृत्तिसंयमपूर्वकं शान्तेर-मृतधाराप्रस्रवणेन प्राणप्रतिष्ठा हि परमो धर्म्मः। पश्य, शुभ्र-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मेघान्तराले गौरकान्तिकपोतमिथुनं प्रेम्नः शान्तेश्च शुभ्रकेतनमुत्तोल्य परिभ्रमति । हे प्रिये, आगच्छ, प्रकृतिः पुरुषश्चावां जटिलतापूर्ण-महायुद्धस्य दुर्भेद्यं दुर्गं विनाश्य प्रकृतिराज्ये साम्यमैक्योः सुदृढं मन्दिरं प्रतिष्ठापयावः । तदा समग्रं जगत् प्रेममयं शान्तिमयञ्च भविष्यति ।

ॐ शान्तिः ॐ शान्तिः ॐ शान्तिः ।

———०———

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तन्मयता

संसारस्य घातप्रतिघातयोः संघातस्य च मध्ये जीवनस्य स्रोतः प्रवहति । गतेर्विरामो नास्ति । विपत्-सङ्कुलावर्त्ते प्रतिबन्धकतां प्राप्य कदाचन हृदयचूर्णनस्योपक्रमो भवति, मर्म्मन्तुदवेदनया प्राणा व्याकुलिता भवन्ति च । कोमलबाहुवल्लर्य्या तटभूमि परिरब्धुं कृतबहुप्रयत्नेनाऽपि विफलमनोरथेन प्रत्यागन्तव्यं भवति । कदाचिदप्रतिहतगत्या पुलकानन्दस्य तरङ्गमुत्पाद्येयं तन्मयता मृदुमन्दध्वनिनाज्ञातवासनाराज्यं नयति । न जाने, कयासम्भवाशया विश्वैन्द्रजालिकस्येन्द्रजालमुग्धेन दुर्व्वहजीवनं वोढ़व्यम् । तथापि हृदये दुर्दमनीयलालसा, करुणव्याकुलता, विफल-प्रयासश्च । नाहं जाने कुत्रास्यान्तो भविष्यति । क्षतविक्षतजीवना-भ्यन्तरेण तीव्राकाङ्क्षायाः क्षीणा ज्योतीरेखा केवलमन्धकारमार्गे उल्कां प्रज्वाल्य परिभ्रमति । अहमकामये बहूनेवाकामये, बहुदिनानि बहुषु स्था-नेषु निराशोऽभवम् । निराशाया अन्तो नास्ति । व्यर्थतां पुरस्कृत्यैव जीवनस्य चञ्चला गतिः प्रचलति । तथाप्यहमकामयेऽनाघ्रातावगुण्ठित-मनोहर-कुसुमम् सौन्दर्य्याभरणालङ्कृत-यौवन-सुलभकमनीयां रमणीयां च कान्ति, आकुञ्चितकेशरकेशगुच्छवेणीविन्यासम्, अपार्थिवरूपसौरभयोरपूर्वसमावेशं, धीरसमीरणहिल्लोलितनृत्यभङ्गिमां, कामगन्धविहीनां मादकतापूर्णां तां लोलुपां दृष्टिम् । अपि चाकामयेऽप्सरःकण्ठविनिन्दितामृतनिस्यन्दिन्याः प्रहेलिकामय्या लज्जिताया विहङ्गिन्या गगणप्लावितस्फुटगीतितरङ्गम् । प्रभातस्य तरुणारुणोदयेन सह दिग्दिगन्तप्लाविमधुरस्वरलहरीम् , वसन्त-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रभातस्निग्धताम् अनवद्यरूपमुग्धताम्, वैशाखस्य मध्याह्नातपे सुशीतल-श्यामलनवपल्लवितगिरिपादपस्नाविनीं सुदीर्घसुरस्यपीयूषधाराञ्च । न जाने जीवनसहजातस्नेहमिमं कथं परित्यजामि । कस्मात् कालादारभ्यान्तः-सलिलाया नद्याःस्रोत इव प्राणोन्मादिनीयं दुर्जयवासना प्रवाहिता न जाने । अद्य चतुष्पथे जीवनमरणयोः सन्धिस्थाने वर्त्ते । अस्तमितप्रायो जीवन-रविः, सन्ध्या अन्तिमाभा विराजते । दूरे तुषारशुभ्रबलाकायूथो माला-कारेण श्रेणीबद्धो यात्रासङ्गीतं प्रगायन्नुड्डीय गच्छति । दृश्यते पुर ईषन्नीलाभम् अतीवास्पष्टं गिरिप्रान्तरम् । उपरि च नीलं नभः । नीलेन सह नीलं सम्मिलितं, निखिलं विश्वभुवनं प्रगाढ़ नीलिममयमि-वाभूत, नीलाम्बरेणाङ्गमाच्छाद्यापूर्वसौन्दर्य्यश्रियं दधाति च । स्थाने स्थाने मेघमालायाः शृङ्गे शृङ्गे हेमपुष्पशोभितविद्युन्मालाया मनोहराणि तोरणानि दृश्यन्ते । विचित्ररागरञ्जितदुकूलपरिहितायाः सन्ध्याकुमार्य्याः कण्ठेऽतिलोलं हारं समर्प्य दिगङ्गना वैजयन्तीपुरेऽलौकिकक्रीड़ां कुर्वन्ति । अहो, कीदृशम् अपूर्वं दृश्यम् ! पश्यामि यन्ममजीवन-साधनाधनं सुकोमलकुसुमसौन्दर्यमाधुरी सान्ध्यप्रतिमारूपेण प्रतिबिम्बिता । सुधाकण्ठविनिःसृतपुरतरङ्गेपारत्रिकमङ्गलकूजनादेन दशदिशः कल्लोलिताः । अनिर्वचनीयरूपसुधां निपीय चित्तं मोहस्वप्नेन तन्द्राभिभूतमभूत् । कियन्तं कालं यावत् तन्मयहिममण्डलचिरसुन्दरस्य नीरवध्याने निमग्न आसम्, तन्न जाने । अस्मिन्नेव समये कोऽपि समागत्य कृष्णां यवनिकामेकां नेत्राग्रेऽधारयदिव । सचकितः समुत्थितोऽहम् मन्दं मन्दं तच्छायाचित्रम् अनन्तेऽदृश्यमभवत् । क्रमेण विश्वमण्डलं गभीरान्ध-कारमयेऽसीमदिगन्ते विलीनमभूत्, जगन्निस्तब्धं जातम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रेम्नो जयः

'सातदला–सरस्तीरे 'डेकावापोः,* कृषिक्षेत्रम्। कतिपयश्रमिकान् नियोज्य स कृषिकार्य्यं गृहकार्य्यञ्च करोति। वास्तुस्थानस्य पूर्व्वस्यां दिशि आदृष्टेर्निरावरणैका मनोरमा वृक्षवाटिका। कृषिक्षेत्रस्य कार्य्यं पर्य्यवेक्ष्यापराह्णे डेकावापु वृंहत्प्रस्तरखण्डे समुपविश्य विश्रामं करोति किमपि लिखति च। स प्रकृतेर्दर्शनीयवस्तूनि दृष्ट्वातीवानन्दं लभते। असौ चिन्ताशीलः। एकान्तमनसा केनापि भावेन किमपि चिन्तयन् तन्मयो भूत्वात्मन एव विस्मरति। कदा सन्ध्या भवति न जानाति। सन्ध्यायाः किञ्चित् प्रागेव गृहं प्रविशति च। डेकावापुपरिवारमध्ये भद्रमुखीनाम्नी काचिन्मार्ज्जारी, पालित-शारिकाशावकद्वयञ्चेत्येत एव कुटुम्बाः। एत एव प्राणिनो गृहं प्रकाशयन्तः सन्ति। कोऽपि डेकावापो–र्दृष्टेरगोचरा न भवन्ति। सोदरवत् ते समग्रं दिनं क्रीड़न्तः समयमतिवाह-यन्ति। साहचर्य्यप्रभावेण तेषामन्तरस्य दुष्टा प्रवृत्तयश्चिराय विलुप्ताः। तेषां मध्ये खाद्यखदकयोः सम्बन्धस्थाने प्रगाढ़ं वन्धुत्वं समजनि।

'डेकावापोः, पाकशालान्तिके वप्रोपरि एका शुभ्रकाञ्चनवृक्षवाटिका वर्त्तते। वृक्षाश्च विरलविटपा नातिप्रांशवश्च। तेष्वेकस्मिन् वृक्षे क्षुद्रं नीड़ं निर्म्माय कपोतमिथुनं सुखेन निवसति। तञ्जीवनचक्रस्य कानिचिद् वेष्टनानि नष्टानि। जीवनस्यान्तिमदिनपर्य्यन्तं पुनरपि कति वेष्टनानि नङ्क्ष्यन्ति तस्य निर्णयो नास्ति। प्रत्यूषे सृष्टिकर्त्तारमुद्दिश्य

Funding by IKS-MoE

* "डेकावापुः" इति कस्यचिन्मनुष्यस्य नाम।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुललितं वन्दनागीतं प्रगाय कपोतमिथुनं वास्तुस्थानं मुखरितं करोति। उदयगिरितो यदा हिमशीतलरेखा प्रकृतिहृदये विस्तृता भवति, तदा सहचरैः सहाहारमन्विष्य कमपि दूरदेशं गच्छति। कोलाहलविहीनस्य क्षुद्रस्य नीड़स्य यदा स्मरति, तदा तु प्रत्यावृत्य किञ्चिद् विश्रामं करोति। चञ्चूवा परस्परं चञ्चुं निपीयाज्ञातभाषया कीदृशं प्रेमलापं करोति, स त्वनुभूतिविषय एव। मध्याह्ने विश्रम्भालापसमय आराधनागीतमेकं गायति च। मरोर्हृदयं प्लावयित्वेव शान्तिनिर्झरं प्रवाहयति। कियत्कालानन्तरं सहचरैः सह पुनरप्युड्डीयाज्ञातस्थानं गच्छति। समग्रं दिनं व्याप्य श्रमेण व्याकुलं भूत्वा 'पुरवीरागेण सन्ध्यायाः गीतं प्रगाय क्षुद्रनीड़े रात्रेः प्रहरचतुष्टयं शान्त्या शेते।

'डेकावापोर्नूतनगृहादिसंस्थापनानन्तरं शारिकामिथुनस्य कपोत-मिथुनस्य च परस्परमान्तरिकं सौहार्दं जातम्। डेकावापुस्तेभ्यो धान्य-माष-तण्डुल-सर्षपादीनि खाद्यानि भक्षणाय ददाति। खेचराश्चत्वारः प्राणिन एकस्मिन्नेव स्थाने समानाहारविहाराः क्रीड़ाकौतुकेन कालं नयन्ति। माज्जर्य्यपि तेषां कौतुकाद्यवलोक्य रमते। तस्या लोभो नास्ति, सा निर्विकारा। तेषां परस्परमेकोऽनाविलप्रीतिभावो दृश्यते। डेकावापुरपि तैः सह स्थित्वा निर्म्मलानन्दं लभते। कपोतमिथुनञ्च डेकावापुतो माज्जारीतश्च भयरहितमभूत्। ते चिन्तयन्ति यदतीते कस्मिंश्चित् काल एकस्यैव गृहस्य वयं कुटुम्बा आस्मेति। विस्मयमारुह्यैव पवित्रमेलनस्य माधुर्य्यलाभः।

अग्रहायणो मासः। कृषिक्षेत्रस्य धान्यानि सुपक्वानि सन्ति सुवर्णाभां दधति स्म। तेषां दर्शनादेव क्षुधापिपासे स्वत एव नश्यतः। एकाग्रदृष्टया

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्थातुमभिलाषो भवति । शुक-कपोत-तुण्डकप्रभृतयः पक्षिणः सुपक्वधान्यानि भक्षयितुं कृषिक्षेत्रमावृत्य निपतन्ति । मानुषाणां दर्शनमात्रेण सर्वेरेकीभूयोड्डीय च शाखायां गुल्मोपरि वा निपतन्ति । एकदा केनापि लुब्धकेन धान्यक्षेत्रमध्ये पाशो योजितः । तदनन्तरं कस्मादपि स्थानात् कपोतयूथ उड्डीय धान्यक्षेत्रमध्येऽपतत् । तन्मध्ये केचन पाशोपरि निपतिताः । कपोतमिथुनस्य कपोतः पाशमध्ये पतित्वा धान्यं भक्षयन्नास्ते । अस्मिन्नेव समये कश्चित् बालक एकहस्तेन पिञ्जरमेकमादायान्यहस्तेन च कतिपयक्षेपणकाष्ठानि गृहीत्वा पाशनिबद्धान् खगान् धर्त्तुं समागतः । मनुष्यदर्शनमुपलभ्य खगाः शलभवद् झटित्येव दिशो गतवन्तः । केचन तु पाशनिबद्धा एवासन् । पाशनिबद्धं कपोतं दृष्ट्वाशान्तहृदया कपोतीतस्ततो भ्रमितुमारेभे । प्रज्वलिताग्निनैव तस्या हृदयं सन्तप्तमभूत् । बालकः पाशस्य जटिलतां दूरीकर्त्तुम् अक्षमः पाशग्रन्थीन् दन्तैश्चिच्छेद । कपोता मुक्ताः सहसैव कुत्रापि गताः । आसन् तस्यैव धान्यक्षेत्रस्याद्रं भूमिभागे कतिपयाः पिच्छिला विषलङ्घिन्यश्च । आसीच्च तच्छायासु निलीय खगान् धर्तुकामः निःशब्दं कश्चिद् गन्धमार्जारः । बालकः क्रोधेनोत्पततः कपोतान् प्रति क्षेपणकाष्ठान्निक्षेपं कृतवान् । तत् क्षेपणकाष्ठं कपोतान् अस्पृष्ट्वा गन्धमार्ज्जारस्याग्रपदद्वये पतितं तेन पादद्वयं भग्नञ्च । ततः खञ्जो गन्धमार्ज्जारो भूमौ पातं पातं कथमपि वनमुपासर्पत् । जना वदन्ति यद् विपत् सहसैवायाति । मन्ये गन्धमार्ज्जार एवमचिन्तयत् तस्यातीव शुभं दिनम् ; एतेषां खगानां मध्यतोऽवश्यमेव कमपि खगं ग्रहीष्यति । प्रबलशीतेन कम्पमानस्य तस्यैतदेव प्रतीक्षाफलं ललाटे लिखितमासीत् । लाभस्थाने हानिरेवाभूत् । भाविकालेऽपि स उपार्ज्जनाक्षमोऽभवत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कपोतः पाशमुक्तो भयेनास्थिरो भ्रमितुमारभते स्म। तस्य किमभूत, कथम्वा स पाशान् मुक्त इत्येतत् सर्वं कपोत्यै वक्तुं नाशकत्। कपोती चकिता ससम्भ्रमं समागत्य स्वनीड़ाय तं नीतवती। मरणविभीषिका दाम्पत्यजीवनसूत्रं कथं छेत्तुमुद्यता तमेव वृत्तान्तं कपोत्याः समीपेऽव्यक्त-भाषया न्यवेदयत्। सम्भाव्यमानविपदाशङ्कया द्वावेवास्थिरौ जातौ। मनसि विचिन्त्य स्थिरीकृतं यद् अपरस्य कुपरामर्शेन विमोहितौ स्वविपदं नाह्वयिष्यतः। निकटस्थसुहृदस्तण्डुलकणान् भक्षयित्वैव सन्तुष्टौ भविष्यतः। तद्दिनात् प्रभृति कपोतमिथुनं कदापि वास्तुसीमां न लङ्घयति स्म, परस्परं सङ्गं नात्यजच्च।

समयस्रोतोभिर्दिनानि गच्छन्ति। दुश्चिन्ताः मनसः क्रमशोऽपगताः। शारिकामिथुनमपि तन्नीड़ं समाहूय सङ्गतिविहीनं किमप्युक्त्वानन्दं जनयति। शारिकामिथुनसमीपे तयोरतीतदुर्घटनाकथां सकरुणं वर्णयति। कपोती प्राह—"यदि पक्षिणो धतुँमज्ञबालकस्थाने कोऽपि धूर्तोजनः समागमिष्यत् तर्हि तत्प्राणवल्लभ आत्मानं त्रातुं समर्थो नाभविष्यत्। मार्ज्जारीं दृष्ट्वा तयोर्मनः संकुचितं भवति। यद्यपि परस्परसान्निध्यवशतो मार्ज्जार्य्या लोभोऽपगतस्तथापि मार्ज्जारजातिः सहजातदोषेण दूषिताज्ञात-चित्ता च। 'डेकावापुं' कपोतमिथुनं पितृवत् मन्यते, यतः स एव हि तयोराश्रयदाता। सरलान् तान् प्राणिनः स एव पोषयित्वा रक्षति। तयोः पुरातनं नीड़ं क्रमशो जीर्णत्वं प्राप। तत्राण्डानि प्रसूय शावकजन्मदानं न सम्भाव्यते। एकैकशः सप्ताष्टौ वा शावकमिथुनान्युत्पाद्य स्वावलम्बीनि कृत्वा मुक्तानि। तानि शावकमिथुनानि स्वं स्वं नीड़ं निर्माय खगजीवनं निर्वाहयन्ति। तेयोरपि यौवनमतीतप्रायम्। कपोत आह—प्राचीनं नीड़ं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भङ्क्त्वा नूतनं नीड़मेकं निर्मामि । कपोती प्राह, नूतननीड़निर्माणे बहुदिनानां प्रयोजनं भविष्यति । इतोऽण्डप्रसवसमयो मे समीपवर्त्ती । अधिकदिनान्य-पेक्षितुमक्षमाहम् । जीर्णनीड़स्यैव पुनः संस्कारं कृत्वा नूतनवत् करोमि । कपोतोऽपि तद्वाक्यं समर्थितवान् । उभौ चिन्तयतः, पुनरपि शावकमिथुनं जनयित्वा वर्द्धयित्वा च पुराणमेतन्नीड़ं तस्मै दास्यामि । आवां वृक्षान्तरे नीड़ं निर्म्माय निवत्स्यावः । 'डेकावापु'परिजना अस्मत्परिजनाश्च मिलित्वा बृहत्कुटुम्बा भूत्वा निवत्स्यामः । तदा कस्यापि मनसि दुःखं न स्थास्यति । वयं सुखिकुटुम्बान्तर्गतत्वेन स्थास्यामः । उभावेव चिन्तया व्याकुलौ भवतः । तौ आकांशकुसुमं रचयित्वा परमानन्दम् उपभोक्तुम् अभि-लषतः । एवंव चिन्तामरीचिका ।

सदैवाज्ञातरूपेण विपदः समायान्ति निर्गच्छन्ति च । आवहमानकालात् प्रचलितेयं प्रकृतेश्चिरन्तनी रीतिः । ऐन्द्रं धनुराविर्भवति नभसि क्षणाय । दूर्व्वादलोपरि शिशिरविन्दवश्चकासति निमेषाय च । अस्य कपोत-मिथुन-स्यापि भाग्यचक्रस्य विपर्य्ययो जातः ।

एकदा कपोतमिथुनं वनं गत्वा काशवनांशून् समानीय नीड़ं वेष्टयामास । नारिकेलस्य गुवाकवृक्षस्य च पत्रेभ्योंऽशून् संगृह्य नीड़ं चिक्कणं कृतवत् । तालवृक्षस्थ-चटकपरित्यक्तनीड़ेभ्योऽपि तृणखण्डानि समाहृत्य नीड़ं नूतनवत् कर्त्तुम् अभिलषितवत् ।

कपोती कपोतं प्राह—गर्भाधानस्य समयो मे समुपस्थितः । अमृततुल्यं पुष्टिकरं खाद्यं भक्षयितुं सुस्वादु पानीयञ्च पातुं गर्भवतीनां चित्तेष्वभिलाषो जायते । अमुष्य पर्व्वतस्य निम्नदेश एको जलप्रपातोऽस्ति । तस्य स्फटिकवन्निर्मलं किञ्चिज् जलं निपीयमहं शरीरं शीतलयितुमिच्छामि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्मत्समीपे स्थितस्य प्रांशुजम्बुवृक्षे निर्मितनीड़स्य वृहत्कपोतयुगलस्य कपोती वर्त्तमानसमयेऽन्तःसत्वा। अहं ताभ्यां सह गत्वा निमेषादेव प्रत्यागमिष्यामि। त्वं कतिपयांशून् समानीय नीड़स्यावशिष्टं कार्यं समापयेति।

कपोता बहुदूरं गत्वा जनसमागमहीनं मनोहरं धान्यक्षेत्रमेकं दृष्टवन्तः जलप्रपातस्य नीरधारा समतल-स्थानं प्राप्य प्रवहमाना निम्नस्थितशस्यक्षेत्रे निपतिता। मन्ये, केनापि कुसुम्भ-वर्णाभवन्यधान्यमेव रोपितम्। सूर्य्यकिरणैः प्रकाशमाना हेमाभधान्यमञ्जर्य्यं उड्डीयमानान् विहगान् हस्तसङ्केतेन सुवर्णाभधान्यबीजानां ग्रहणाय हार्दिकं निवेदनं ज्ञापयन्तीव। कपोता अपि धान्येनोदरं परिपूर्य्याकण्ठं जलं निपीय परितृप्ताः पर्व्वतप्रान्तस्योच्चवृक्षशाखान्तराले क्षणं विश्राममलभन्त। कियन्तं कालं प्रकृतेरपूर्व्वदृश्यानि पश्यन्तो मुग्धा आसन्निति ते न जानन्ति स्म। कियत्समयानन्तरं पश्चिमं नभोऽन्धकारेण समाच्छन्नमभूत्। प्रबलवात्यया सर्व्वमेव विपर्य्यस्तम् काका व्याकुला काकारवं कृत्वोत्पतन्ति स्म। सरलप्रकृतिप्राणित्रयं निरुपायं दिग्भ्रान्तं सत् क्वापि गतम्।

प्रकृतेः प्रलयङ्करीं मूर्त्तीं दृष्ट्वा कपोतस्य मनसि पूर्व्वस्मृतिरुदिता। प्रियाविरहेणोद्भ्रान्तः सन् वारं वारं प्रतिशाखं मर्म्मन्तुदस्वरेण प्रियामाह्वयति स्म, यथा कान्तावियोगविरहेणोद्भ्रान्तश्चक्रवाकः पुनः पुनः—

आयाति याति पुनरेव जलं प्रयाति
पद्मांकुराणि विचिनोति धूनोति पक्षौ।
उन्मत्तवद् भ्रमति कूजति मन्दमन्दम्
कान्तावियोगविधुरो निशिचक्रवाकः॥

—कालिदासः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कपोतोऽद्य निर्मितं नीड़ं निर्म्मातुं तृणभ्रान्त्या पद्मपत्राणि चञ्च्वा विदार्यैत-स्ततः विकिरति स्म ।

प्रभातप्राया यामिनी । कस्मादपि दिगन्ताद् अस्फुट एको रवो धीर-समीरणेन प्रवाहितः पव्वंतगात्रप्रतिहतस्तस्य वेदनापरिपूरितहृदये प्रियामेलन-शुभवार्त्तायाः प्रतिध्वनिं कृत्वा विलीनः । स आनन्देन व्याकुलो जातः । सुनिर्मितमनोहरनोड़स्य द्वारदेशे स्वल्पेन हृदयेन प्राणदयितां परिरब्धुकामः सोत्कण्ठं प्रतीक्षते स्म ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मौनवेदना

कस्यचिद् देवस्थानस्य समीपे शिलामयपर्वतपङ्क्तिरेका वर्तते। देवस्थानस्य दक्षिणभागे आनगर्य्या विस्तृतो राजमार्गः। वामे च विस्तीर्णा नद्येका प्रवहति। पर्वतहृदयं विदार्य्य क्षुद्र एको निर्झरोऽव्यक्तशब्देन तस्यामेव नद्यां पतितः। निर्झरस्योभयस्मिन् पारे विविधाकारा वृक्षा वर्तन्ते, स्थाने स्थाने गुल्माश्च। अनातपस्थानेषु श्यामवर्णशिलाजतूनामुद्भवेन तत् स्थानमतीव रमणीयं दृश्यते। पर्वतस्य निम्नभागे पाषाणवेष्टितं क्षुद्रं कुण्डमेकम्। निर्झरस्य जलैस्तत्कुण्डं परिपूर्णं तिष्ठति। 'रुपता-सरुघना-डरिकणा'नामकाः क्षुद्रा मत्स्या कुण्डे क्रीड़ां कुर्वन्तः सन्ति। निर्झरस्य स्रोतसा मत्स्या बहुदूरं यावत् स्रोतसः कदाचिदनुकूलं कदाचिच्च प्रतिकूलं यान्ति।

राजमार्गेण यानवाहनानां गमनसौकर्य्याय मार्गमध्ये प्रस्तरखण्डानि क्षातुं निम्नस्थानस्थितमहत्प्रस्तरेषु रन्ध्रं कृत्वा तन्मध्ये विस्फोरकगर्भनल्याम् अग्निं संयोज्य तान् बभञ्जुः। तस्मादेकम् उद्धमानयोग्यं प्रस्तरखण्डं निपत्य निर्झरस्य कियद्दूरे नदीतीरस्थशुष्कस्थाणुमाश्रित्य स्थितम्। तत्प्रस्तरखण्डं कुटुम्बरूपस्वजनाद् विच्छिन्नं स्वजनविरहितमिव नदीतीरस्थप्रवणभूमिभागस्य हरिततृणखण्डे तिष्ठति। तत्समीपे प्रस्तरखण्डमपि नास्ति। प्रतिदिनम् आतपेन वृष्ट्या च क्लिष्टं भवति। ब्रह्माण्डवत् पूर्वदिशि कृतमुखस्य तस्य प्रकाण्डप्रस्तरस्योपरि स्फटिकस्रोतोवन् निर्झरसुशीतलजलं प्रस्तरस्य बिस्तीर्ण हृदयं शीतलयति स्म। प्रस्तरखण्ड-

Digitized by eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्योपरि जलपतनात् समुत्पन्नानि शैवालानि कोमलानि च बालतृणानि भक्षयितुं 'शरसुगरी-खटीया'नामका मृगविशेषा आगच्छन्ति । देवमनुष्य-विहीन एकान्तस्थाने ते नानाक्रीड़ाः कुर्वन्ति च । एतत् सर्वं दृष्ट्वा प्रस्तर-खण्डस्य मनसीषदीर्षाभावोऽजायत । तत्प्रस्तरखण्डं मनसा व्यचिन्तयत्, केनापि प्रकारेण यदि पातं पातं निर्झरस्य जलमधः गन्तुं शक्नोमि, तर्हि सर्वथाहं कृतार्थं भविष्यामि । मम हृदयोपरि रौप्यवर्णाभा मत्स्य-शावका नृत्यन्त इतस्ततो भ्रान्त्वा मे कठिनं हृदयं शीतलं करि-ष्यन्ति । आतपसन्तापेन सन्तापिताः परिश्रान्ता मृगशावका निर्झरस्य शीतलं नीरं पातुम् आगमिष्यन्ति, जलदर्पणे स्वकीयं मुखं दृष्ट्वानन्दे-मेतस्तत उत्प्लुत्य भ्रमिष्यन्ति । मत्परित्यक्तप्रस्तरखण्डानां वा कीदृशी दुर्गतिर्जाता ! मन्ये मुद्गराघातेन यन्त्रस्य च पेषणेन कानिचिद् वर्त्तुला-काराणि कानिचिद् वा कर्करसदृशानि जातानि । कानिचिद् वा मार्गे पातयित्वा यन्त्रपेषं पिष्ट्वा मृत्तिकया सह समानत्वं नीयन्ते । पातित-प्रस्तरखण्डोपरि यानानि वाहनानि च निर्बाधं गच्छन्ति । तेषां दर्शनेन मम हास्यं जायते । तेभ्योऽहं कियत्सुखीयान् ! प्रस्तरश्चिन्तावायुना-स्थिरोऽभवत् । प्रस्तरोऽलीकं चिन्तयति, जीवनेन सह सारज्ञस्यहीना निःसाराः कथा विचिन्त्य व्याकुलो भवति, चिन्तया हृदयं सन्तप्तं भवति च । कदाचिच्चिन्तया चकितो भवति । यदा तस्य मनसि ज्ञानमायाति तदैव तेन ज्ञायते यत् स प्राग् यथासीदधुनापि तथैव वर्तते ।

एकदापराह्णे काचिद् वर्त्तकी यदा तन्मस्तकोपरि कुत्रचिद् गच्छति, तदा प्रस्तरः पक्षिणीं सहसा वदति, भो पक्षिणि, त्वां किमपि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रष्टुमिच्छामि, क्षणं स्थास्यसि किम् ? पक्षिणी प्राह–भवतु, यत् प्रष्टुमिच्छसि पृच्छ । प्रस्तर आह— त्वं कस्मादागतोऽसि, कुत्र वा गमिष्यसि ? पक्षिणी प्राह–अहं दक्षिणदिशो धान्यक्षेत्रस्य जलाशयतीरे 'आरालितृण'च्छायासु क्षुद्रं नीड़मेकं निर्माय शावकद्वयेन सह निवसामि । त्वत्समीपस्थनिर्झरस्य किञ्चिन् निर्मलं जलं पीत्वा मया पिपासा निवारिता । अधुना नीड़ं प्रत्यागमिष्यामि । प्रस्तर प्राह—त्वं सर्वदा पक्षौ विस्तार्य्य वायुरथम् आरुह्य बहुदूरम् उड्डीयसे । एतन्मार्गपार्श्वे पातितप्रस्तरखण्डानि वर्त्तन्ते नवेति त्वं जानासि किम् ? पक्षिणी प्राह-उच्छ्रितप्रस्तरखण्डस्तूपा राजमार्गे निपातिताः । तानि प्रस्तरखण्डानि भूमौ समीकृतानि तिष्ठन्ति । तदुपरि मनुष्या गावो मृगा दानवसदृशा गुरुभारवाहिनः शकटाः प्रबलवेगेन गच्छन्ति । चक्राणां महता भरेण कानिचित् प्रस्तरखण्डानि चूर्णीकृतानि । कानिचिन् मार्गोपरि आश्रयहीनानीव पतितानि वर्त्तन्ते । तेषां विपत्तिरन्तो नास्ति । कानिचिच्च पथिकानां पदपीड़नेनैकस्माच्चतुष्पथाद–परचतुष्पथं यावल्लुण्ठन्ति । विपरीतदिशा समागतस्य कस्यचित् पथिकस्य पदाघातेन च पुनरपि पूर्वस्थानं लभन्ते । यदि कथमपि परिखायां पतन्ति तर्हि तदेव हि तेषां शान्तिर्भवति । एषैव प्रस्तरखण्डानां जीवनस्य निष्ठुरक्रीड़ा । त्वन्तु तेभ्यः सुखीयान् । प्रस्तरोऽवदत् भवति । मम दुःखकथा त्वया कथं सम्यग् ज्ञायते ? विषाददीर्घतमं कालं यापयामि । आगच्छन्तो वनवासिनः पक्षिणो निर्झरस्य जलं पातुं तत्र स्नातुञ्च ममोपरि समुपविश्य पक्षान् विधून्वन्तो निरन्तरं सङ्गतिविहीनं किमपि प्रलपन्ति । गमनसमये मदीयं शरीरमपवित्रं कृत्वा गच्छन्ति च । यस्मात् कालादहमत्रास्मि तत आरभ्य मदीयककंशदेहोपरि सर्वदा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नानात्याचाराः प्रचलन्ति । अहमेतद्वनवासिनां पक्षिणामेकं मञ्चगृहमिव । यदि क्वचित् 'प्रबलवृष्टि र्मम रुचं देहं प्रक्षालयति, तदा कियदिनपर्य्यन्तं किञ्चित् सुखमनुभवामि समग्रं दिनं व्याप्य कियान् आघातो मयानुभूयते तदहमेव जानामि 'प्रसूतिरेव जानाति प्रसववेदनाम्' । त्वं खेचरः पक्षी, निर्जीवपदार्थानां दुर्गतिं कथं ज्ञास्यसि—पक्षिणी प्राह वयं क्षुद्राः प्राणिनः, न वयं पार्थिवज्ञानसम्पन्नाः । प्रकृतिजातजीवानां मध्ये मनुष्या एव श्रेष्ठाः । जगति शृङ्खलारक्षार्थं तैः क्षेत्रविशेषे प्रकृतिविरुद्धकार्य्यमपि कर्त्तव्यं भवति । ते ध्वंसोमुखिनो न भवन्ति, अपि तु सृष्टिमुखिन एव । ते कल्पनायाः सृष्टिप्रतिभायाश्च बलेन प्रकृतिजातानि वस्तूनि रूपान्तरितानि कृत्वा वास्तवरूपस्य सृष्टिं कुर्वन्ति । पश्य, यत्राहं निवसामि ततक्षेत्रस्थप्रकृतिजाततृणानि केषाञ्चिज् जीवानां प्रधानखाद्यानि । कर्षकास्तु तृणानि विनाश्य जीवानां भक्ष्यस्वरूपं खाद्यमुत्पादयन्ति । ततोऽसंख्यप्राणिनामात्मरक्षाया अवलम्बनं भवति । सृष्ट्यर्थं यथा तृणानां विनाशप्रयोजनं वर्तते, तथैव गमनसुविधार्थं प्रस्तरान् खण्डीकृत्य राजमार्गे पातनस्याप्येक एव हेतुः । तव निवासभूतस्यास्य पर्वतस्य निम्नस्थानस्थिताः प्रकाण्डाः प्रस्तराः सृष्टिकालादारभ्य भूगर्भे स्थित्वा पृथिवीं धारयन्तः सन्ति । बहुयुगानि यावद् बहिर्जगता सह सम्बन्धरहितास्ते कठोरं कर्त्तव्यं पालयन्तः सन्ति । प्रकाण्डाः प्रस्तराः, अणवः परमाणवश्च पृथिव्या आत्मस्वरूपाः । त्वमपि तस्यैव प्रकाण्डप्रस्तरस्य क्षुद्रतमोंऽशः । कठिनप्रस्तरा वक्षःसु पृथिवीं धारयित्वा सहिष्णुतायाः कीदृशीं पराकाष्ठां प्रदर्शयन्ति ! पृथिव्या महदुपकारार्थं तव त्यागस्यातीव प्रयोजनं विद्यते । पार्थिवैः पदार्थैः पृथिव्याः सजीवीकरणं प्रकृतेर्धर्म्मः ।

Funding by IKS-MoE

BVBSSMV

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतदुक्त्वा सा पक्षिणी कुत्रास्युड्डीय गता ।

नदीतीरसमीपेन स्रोतसः प्रतिकूलं गच्छतः कस्यचिन् नाविकस्य कर्णाघातेन स जीर्णः स्थाणुराश्रितपाषानाद् विच्छिन्नः कुत्रचित् पतितः । उद्वमानयोग्यः स प्रस्तरोऽपि विलुण्ठन् निर्झरस्रोतसि बाधकरूपेण तस्थौ । स चिन्तितवान् यत् तस्य शुभानि दिनानि समागतानि । शरीरे जलार्द्रे सति हृदयं सुशीतलं भूत्वा स्थास्यति । शरीरोपरि क्षुद्रमत्स्यानां गमनागमनाभ्यां मनसि सन्तोषो भविष्यति । जगतः सुखदुःखहास्यक्रन्दनानि नभसो मनोहरदृश्यानि चावलोक्य स महान्तमानन्दं प्राप्स्यति 'मनः परिकल्पयति विधिस्तु तन्नाशयति' । विधेर्विधानेन तस्य विपरीतफलम् अभूत् । तस्य शरीरं जले सम्पूर्णं न निमज्जितम् । पक्षिभिरपवित्रीकृतं तदवक्षो जलोपरि स्थितवत् । मत्स्यानां गमनागमने निरुद्धे । मत्स्यशावकानां कृते च प्रतिबन्धकोऽभवत् । जलधारा विशालप्रस्तरस्यापरपार्श्वेन प्रवाहिता । मत्स्याः स्रोतोऽभिमुखं गन्तुं समर्था नाभवन् । ते प्रस्तरमपृच्छन्, भो प्रस्तर, अस्माकं मार्गविघ्नकारकस्त्वं कथं भवसि ? प्रस्तरोऽवदत्, स्नेहभाजनभगिन्यः, ममोपरि क्रोधं मा कुरुत । स्वेच्छया नाहमत्र समागतोऽस्मि । गमनेऽपि नास्ति मे शक्तिः । सर्वं प्रकृतेरिच्छा ।' मत्स्याश्चिन्तितवन्तो यत्तेषां सुखस्य दिनानि व्यतीतानि । ततो मत्स्याः कुण्डं प्रत्यावृत्य सावधानं स्थातुमुपायान् चिन्तितवन्तः ।

आषाढ़मासस्य कस्मिन्नपि क्षणे रात्रौ प्रबला वृष्टिर्जाता । जलेनोच्चनीचस्थानानि समानत्वमापादितानि । पर्वतपृष्ठादपि जलौघोऽवतरति स्म । क्षुद्रनिर्झरस्योपर्य्यप्येतादृशं प्रखरं स्रोतः प्रवाहितमभवद् यत् काचिन् नूतनतरी प्रवाहितेव । प्रभाते दृष्टं यन् निर्झरः स्वाभाविकीं गतिं

Funding by IKS-MoE
BVBSSMV

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परिवर्त्त्य भिन्नया दिशा प्रावहत् । प्रायः सर्व्वे मत्स्याः कुण्डाद् वहिर्गत्वा विशालायां नद्यां गताः । केवलं केचन (१)'डरिकणा'मत्स्यशावकास्तस्मिन् कुण्डे क्रीड़न्तः सन्ति । उद्ध्मानयोग्यप्रस्तरोऽपि प्रबलस्रोतसि स्थातुमशक्नुवन् पर्वतस्य तुङ्गपार्श्वस्थितं प्रांशुपाषाणमेकमवलम्ब्य स्थितः । सर्व्वाभिशप्तं जीवनं गृहीत्वा स कियन्तं कालं यावद् यन्त्रणाभोगं करिष्यति, अदृश्यो विभूरेव जानाति ॥

———o———

(१) 'डरिकणा' इति क्षुद्रमत्स्यविशेषस्य असमीयाभाषायां नाम ।

Digitized by IKS, MMV

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जीवनाभिलाषः

पर्वतनितम्बस्य नतोन्नतभूमिभागे निःसारवृक्षमूलोपरि बल्मीक एको वर्त्तते । कलशशोभितं देवमन्दिरमिव तद्वल्मीको दर्शनीय आसीत् । कस्यांश्चिन् निशायां करकावृष्टिपातेन वल्मीकी विगलितो निश्चिह्नोऽभूत् । केवलं विगलितस्थाणोर्जीर्णाविशिष्टांश एव वर्तते । पुट्टिकाः कुत्राप्याश्रयमलभमाना इतस्ततः परिभ्रमन्ति स्म । तासां स्तोकमप्याश्रयस्थानं नाभवत् । ततो गण्डस्योपरि विस्फोटकः जातः । कस्मादपि दीर्घपादो मण्डूक एकः समागत्य सरलाः पुट्टिका एकैकशः झटिति गिलति स्म । प्रायः सर्वा एव भक्षितवान्च । ततः कश्चित् सर्पोऽवसरमुपलभ्य मण्डूकस्य पश्चात्पादद्वयम् ओष्ठपुटे कृत्वा दन्तैश्चर्वयित्वा भक्षयितुमारभते स्म । तस्य कीदृशी विपत् समुपस्थिता तद्विषये तस्य ज्ञानमेव नासीत् । स वल्मीकसमीपे जिगमिषति, सर्पस्तु तमुदरमध्ये प्रवेशयितुमिच्छति । परस्पराकर्षणेन स निरुपायो भूत्वा परिश्रान्तोऽभवत् । सोल्लासं पुनरपि वहिर्गन्तुमभिलषति, नतु पारयति । पदमात्रमग्रे गच्छति चेत् पदद्वयं पश्चाद् गच्छति । कः पश्चान् नयति तेन न बुध्यते । याः स्वल्पसंख्यकाः समीपमागच्छन्ति, ता जीविताशया क्षुधायास्ताड़नया वा स ग्रहीतुमिच्छन्नपि न पारयति । अग्रपादद्वयं प्रसार्य पुट्टिका धत्तुं वृथा चेष्टते, तास्तु बहुदूरं गता इवेति तेनानुमीयते सर्वप्रयत्नेनापि पश्चात्पादद्वयं मोक्तुं न शक्नोति । तं कोऽपि जीवितान्तकः किमप्यज्ञातस्थानं नेतुमिच्छति । स किमपि बोद्धुं न क्षमो भवति । स कातरोक्त्या यस्य कस्यापि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

साहाय्यं प्रार्थयते, कस्यापि प्रतिवचनमपि तु न लभते । कोऽपि तत्-समीपं नागच्छति । आनन्दमयं भोग्यं संसारं प्रति प्राणानां कियान् अनुरागः ! कियन्ती प्रार्थना च ! स किम् अनेनैव प्रकारेण क्रमशः कष्टं भुञ्जानः संसाराच्चिराय गमिष्यति ? चिन्तयन् स पारं न पश्यति । चिन्तया गती रुद्धा भवति, बुद्धिरपि दूरं न प्रचलति । अत ऊर्द्धं तस्य चिन्ताशक्तिरेव रहिता भवति । भेको वेदनाकातरकण्ठेनारटति निष्प्रभनयनाभ्यां सर्वत्र परावृत्यावलोकयति, अपितु सर्वमन्धकारमयं पश्यति । स किं मायामोहपूर्णसंसाराच्चिरायान्तर्हितो भविष्यति ? नहि, मृत्युस्तस्य न काम्यः । मृत्योर्निष्ठुरक्रीड़ा तेन कदापि न दृष्टा । मरणमालिङ्गितुं स नागतः, संसारस्य क्षणिकाभिज्ञता तेन न लब्धा । तस्य बान्धवानां वयस्यानाञ्च मरणाश्रयनं न दृष्टम् । स मृत्युं विजित्य विलासमये संसारेऽस्मिन् राजोचितं भोगं भुञ्जानः सुखेन सन्तोषेण च स्थास्यतीति तस्य जीवनस्य परमा तृष्णा ।

समीपवर्तिनो ग्रामस्यान्ते 'भक्तदाहदिहदार'स्य, गृहम् । सोऽतीव सरलः । निःसङ्गकपोतशावक इवासीत् स परिजनविहीनः । कियद्-दिनेभ्यः प्राक् तस्य ककुव्वर्णा पूर्णगर्भवती काचिद् गौर्यूथभ्रष्टा कुत्रचिद् गता । ताम् अन्विष्यन् स परिश्रान्तोऽभवत् । महान्तं परिश्रमं कृत्वापि तेन सा गौर्न लब्धा । एतद्विषये स सर्वज्ञेन सहालोचितवान्, सत्-सङ्गगृहे सप्रदीपनैवेद्यं दातुं मनश्चक्रार, सार्वजनीनदेवस्थाने सुपक्व-मनोहरकदलीस्तवकेन सहापक्वं भोगं दातुं मनसा सङ्कल्प्याणकमेकं तदर्थं धर्मग्रन्थस्थापनस्थाने संरक्षितवान् ।

Funding by IKS-MoE

स चिन्तितवान् यद् आसन्नप्रसवा सा गौः कुत्रापि मृतवत्सं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रसूतवती, उत प्रसवरोधेन मृता । आहोस्विद् वनराजस्योदर एव प्रविष्टा ? तत् स्थिरीकर्त्तुं न शक्नोति । व्याकुलः सन् इतस्ततोऽन्विष्यति स्म । तथापि तं प्रति भगवान् प्रसन्नो नाभूत् । भवतदाहो निद्रारहितोऽभवत् । कदाचित् समग्रां निशां निद्रामलभमानः प्रत्यूष एव गामन्विष्यन्त्त्वरया वल्मीकसमीपस्थवटवृक्षसमीपं प्राप । काशविरणप्रभृतिवनानामन्तरालेन निरीक्षणमकरोत् । कुत्राप्यपश्यन् स हताशोऽभवत् । अस्मिन्नेव समये वल्मीकस्य समीपे रोमाञ्चकर व्यक्तिकरम् अवलोक्य 'भकतदाहदिहदार'श्चकितोऽभवत् । स तन् मृत्युसंग्रामं निर्निमेषं दृष्टवान्, तद दृष्ट्वा कर्त्तव्यविमूढोऽभवच्च । पुनरपि स दृष्टवान् यद् वल्मीकस्य पश्चादभागे नातिदूरे विलात् फणामुत्तोल्य चतुर्दिक्षु दृष्टिं कुर्वन् कश्चिदजगरः सञ्चालितपुच्छं कञ्चित् प्राणिनमश्यदिति । तदृष्ट्वा तस्य सर्पस्याग्निस्फुलिङ्गसदृशं नेत्रद्वयं प्रफुल्लितमभवत्, जिह्वे च लेलिहानेऽभवताम् । भकतदाहो यष्टिं सञ्चालयन् तं सर्पं हन्तुमुद्यतः । सर्पो भयेन वशीभूत इङ्गितेन विज्ञापितवान्—देव ! मां मा जहि, नाहं तव किमप्यनिष्टं कृतवानस्मि । कारणं विना वयं कमपि न दशामः । जीवानां भोजनेन जीवनधारणमेवामिषभोजिनां जीवानां जैवधर्मः । वयं सरीसृपजातीया जीवाः । क्षुधानिवारणार्थं यत्परिमिताहारस्य प्रयोजनं तस्मादधिकं नाशरमहे । प्रयोजनातिरिक्तस्यापचयं कुर्वन्ति मांसाशिनो जीवाः । त्वं जीवश्रेष्ठमनुष्योऽपि निकृष्टामिषभोजिजीववज्जघन्यजान्तवधर्मं पालयसि । 'वयं क्रूराः, इत्याख्यां यूयमेव दत्तवन्तः । मनुष्यजातेरत्याचारेण वयं भूगर्भे स्थित्वाप्यात्मरक्षाया उपायं न लभामहे । पृथिव्यामामिषभोजिनो जीवा यदि नास्यास्यन् तर्हि निरामिषभोजिजीव—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रेणीनां संख्यावृद्धया परस्परं संघर्षणेनात्मकलहस्य सृष्ट्या महाप्रलयोऽभविष्यत् । अहं सकातरं त्वां प्रार्थये, मदभोजनेऽनभीप्सितोऽन्तरायो मा भव । आसृष्टेः क्षुद्रैर्जीवैः सहास्माकं खाद्यखादकसम्बन्धो वर्त्तते । क्षुद्रा जीवा एवास्माकं प्रधानाहाराः । क्षुद्राः सर्पा यद्यप्यस्मभ्यं सजातीया वंशीयाश्च तथापि तेऽस्मत्तो जात्या हीनाः । वयं कुलीनाः । जीवनधारणार्थमस्माकं सर्पमण्डूकयोरुभयोः प्रयोजनं विद्यते । पश्य, पुट्टिकाः केवलं तस्माद् वृक्षमूलाद् रसं पीत्वा न जीवन्ति । वृक्षमूलस्थकीटादीनपि निःशेषं भक्षयन्ति च । मण्डूकाः पुट्टिकाः खादन्ति, सर्पेऽपि मण्डूकं भक्षयितुं चेष्टते । एको जीवोऽपरं भक्षयित्वा जीवितुमभिलषति । अत उभावेव मम खाद्यम् । युगपद् द्वयोर्भोजनेनैव हि ममोदरपूरणं भविष्यति । यस्य वृक्षस्य निम्नस्थाने त्वं वर्त्तसे, तद्वृक्षस्यैवोच्चशाखायां यद् उत्क्रोशपक्षिमिथुननीड़ं वर्त्तते तत् पश्य, पक्षिणी शावकानां भक्षणार्थं नखैर्गृहीत्वा क्षुद्रं बोदालमत्स्यमेकमानीतवती तव गौः प्रसूता चेत् तस्या दुग्धं त्वं पास्यसि । अतो गामन्विष्योन्मत्त इव सोरस्तारं परिभ्रमसि । त्वं मदविनाशाद् विरतो भव । अतः परं सहसैव तस्य सुप्ता हिंसावृत्तिर्जागृताभूत्, स दन्तैः सर्पस्य पुच्छं गृहीत्वा शनैःशनैर्गर्त्तमध्ये प्राविशत् ।

भकतदाहो नानाकथा विचिन्त्य सर्पं न निहतवान् । आसीच्च तस्य मनसि यत् सर्पस्यास्य सर्वा युक्तयो न ग्राह्याः । तृणभोजिनो निरामिषभोजिनश्च जीवाः संसर्गप्रियाः । ते सर्वदा सङ्घबद्धास्तिष्ठन्ति । वदन्ति च जना यत् 'संहतिः कार्यसाधिका' । हिंसुकेभ्यो जन्तुभ्य आत्मरक्षार्थं सरलजीवानां मध्ये येषाम् आत्मबलं वर्त्तते, ये च विभिन्नकौशालानि च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जानन्ति त एवात्मरक्षां कुर्वन्ति । अतो जगदिदमविनश्वरम् । पृथिव्या मुहुर्मुहुः परिवर्तनं सम्पद्यत एव । वस्तुतः कस्यापि कोऽपि नात्मीयः, तथापि जीवा आत्मसुखलाभायाविरामं सार्थमेवानुधावन्ति । मन्ये, एकदा-गमिष्यति स क्षणो यस्मिन् सर्वाः पार्थिवसम्पदो नङ्क्ष्यन्ति ।

आसीद् भकतदाहो यष्टिशिरसि चिबुकं संरक्ष्य कियन्तं समयं यावन्निस्तब्धः । अपमृत्योर्भयङ्करं रूपं दृष्ट्वा स विमूढोऽभूत् । महा-कालस्य करुणप्रधाननाटकस्य करुणदृश्यान्यवलोकयितुं तस्येच्छा नाभूत् । कपोलनिस्यन्दिते लोतकधारे तप्तं वक्षःस्थलं क्लेदयतः स्म । ध्वंसोन्मुखिनो जगतोऽन्धकारदिशं द्रष्टुं सुस्थिरोऽधिकसमयं नातिस्थत् । दीर्घं निःश्वस्य 'अस्थिराणि हि धनजनजीवनयौवनानि,' 'अस्थिरः संसारश्च,' इति देहतत्त्व-मूलकं गीतं गायन्निच्छन्निव गृहाभिमुखं प्रायात् ।

तदा मध्याह्नसमयः । कियद्दूरं गत्वा स दृष्टवान् यद गृहमार्ग-सम्मुख एव हृष्टपुष्टेन सुश्रीकेन वत्सेन सह सा गौः तिष्ठति । अङ्गसंस्पर्श-मनुभूयसा तस्य मसृणं देहं स्नेहेन लिहन्ती वर्तते । स्वामिनं दृष्ट्वा सा सस्म्भ्रमं 'हेम्भारवमकरोत् । भकतदाहस्य रक्तिमोष्ठद्वये हास्याभा प्रकाशिताभवत् ।

Funding by IKS-MoE

'भकतदाहः,' इति कस्यचिन्मनुष्यस्य नाम, 'दिहदारः' इत्युपाधिश्च ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रदीपाधारः प्रदीपश्च ।

*'ठुकुवलीया' ग्रामस्यैकस्मिन् प्रान्ते निर्जने स्थाने हरिमन्दिरमेकं वर्तते । हरिमन्दिरस्याभ्यन्तरमुन्मुक्तम् । कुड्यसंलग्नमञ्चेषु परिपाट्या सुसज्जिताः सच्चलिखिताः कतिपयधर्म्मग्रन्था विद्यन्ते । अष्टप्रहरान् व्याप्य तत्समीपे प्रदीप एकः प्रज्वलितो वर्तते । एकदा सन्ध्यासमये कश्चित् प्रौढो भक्तो जनोऽतिथिरूपेण समागत्य मन्दिरस्यालिन्दे वस्त्रेण सर्वशरीरमाच्छाद्य शयानस्तिष्ठति । अधिकरात्रिपर्य्यन्तं प्रज्वलितः स प्रदीपः फुल्काररवमकरोत् । स भक्तः प्रबुद्धः सन् शिर उत्तोल्य सर्वत्र दृष्टिपातमकरोद् अपि तु कुत्रापि किमपि नापश्यत् । ततः स दत्तावधानो मुद्रितनयनो निस्तब्धः स्थितवान् । निद्रा समागतप्राया । प्राणिनः सर्वे निःशब्दाः । समये समये *उच्चिङ्गटः' समग्रां निशां व्याप्य शब्दायते स्म । निद्रालसो भक्तः दत्तावधानः शृणोति यत् प्रदीपप्रदीपाधारयोर्मध्ये वितर्कोऽभूत् । प्रदीपाधारः प्रदीपमाह—'भोः प्रियमित्र ! कियत्कालपर्य्यन्तं त्वं मां पीड़यिष्यसि ? हरिमन्दिरप्रवेशात् प्राक् नासीदावयोर्मध्ये परिचयः; अधुना तु त्वं मम शीर्षोपरि समुपविश्य पार्श्वपरिवर्त्तनेऽपि बाधको भूत्वा निरुणत्सि । शरीरञ्च तैलेन निमज्जयसिमाम् पृथिव्याः सर्वे पदार्था ज्योतिर्लभन्ते, अहन्तु चिरान्धकारे निमज्जितस्तिष्ठामि । न जानेऽहं कस्मिन् जन्मनि तव कमपराधं कृतवान्, येन तव पदतले कष्टं भुञ्जानोऽस्मि । मित्र, कदाहं तव नागपाशान् मुक्तो भविष्यामि ?' सहसा शिखा प्रज्वलिता । ततः क्षणं स्तम्भितः प्रदीप आह—'मित्र, तव बुद्धि-

Funding by IKS-MoE

१ *'ठुकुवलीया इति कस्यचिद् ग्रामस्य नाम । २ 'उच्चिङ्गटः' कीटविशेषः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

भ्रमो जातः। मम प्रयोजनार्थं हि तव जन्म। ममावरक्षणाय त्वं, त्वदर्थं-
चाहम्। उभयोर्मध्येऽविच्छेद्यसम्बन्धो वर्तते। त्वं कस्यचिद् वृक्षस्य
क्षुद्रांशमात्रम्। प्रकृतिराज्येऽपरपदार्थवत् तवापि प्रयोजनमस्ति। जगतो
महतां कर्मणां साधनाय तवावश्यकता विद्यते। क्षुद्रवस्तूनां विभिन्ना
अंशा अपि त्वत्सदृशमेवात्मत्यागं कुर्वन्ति। त्यागाय हि तव प्रयोजनं
विद्यते। तव यथा वन्दिजीवनं ममापि तथैव। द्वावेवैकस्य मार्गस्य
पथिकौ। घृणादंशनाद् गलनाच्च त्रातुं तैलमेव सहायकं भवति। त्वं न
जानासि, त्वत्तोऽप्यधिकतरः क्लेशो मयानुभूयते। मद्वदनाद् अहर्निशम्
अग्निर्न निर्वाति। दग्धप्रायोऽस्मि। मादृशाद् अकिञ्चनाद् यदि जगतः
किमपि मङ्गलं भवति, तर्हि तेनैव दग्धवदनस्य मम जन्मनः सार्थकता भवि-
ष्यति। भो मित्र, त्वं कस्यचित् काष्ठस्य तुच्छांशः अहन्तु दग्धमृत्तिकाया
अगभीरकपालः। वक्षसि किञ्चित् सार्षपं तैलं कार्पासवर्तिश्च वर्तते। वदने
च महातेजस्विनः सर्वव्यापकस्य वह्नेः स्फुलिङ्गः। सर्वेषां पदार्थानामंशैरे-
कस्या विराटशक्तेः सृष्टिर्भवति। प्रदीपाधारः, मृत्तिका, तैलम्, वर्तिः
वह्निश्चेति पञ्चशक्तिसंयोगेन ज्वलद्वह्नेर्ज्ञानस्य वा विकाशो भवति
पदार्था धारका वह्निर्धारणा ब्रह्मतेजो दिव्यज्ञानम्वा। यदानेन व्यापकतया
जगत् सुरक्षितं क्रियते तदैव प्रकृतिः सजीवा सती जीवान् रक्षति। एतत्
प्रभावेणैव पृथिवी यन्त्रवत् परिचालितासम्भवमपि सम्भावयति। उक्तं
त्वया यत् त्वामहं चिरान्धकारे निमज्जयन्तस्मि। त्वयान्यथा न मन्तव्यम्।
सर्वे वयं प्रकृतेः क्रीडनकानि, स्रष्टा क्रीड़ामोदी च। अस्मान् आदायैव
तस्य सार्वभौमत्वप्रकाशः। अणुषु परमाणुषु च सर्वत्रैव तस्य गरिमा
समुद्भासितः। पश्य, शिफा एवामुं वृक्षं जीवन्तं सौन्दर्यवर्द्धकञ्च कुर्वन्ति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शिफा हि वृक्षस्य जीवनम्। ता एव पृथिवीमध्याद् रसमाहृत्य वृक्षस्य जीवनं रक्षन्ति। इक्षुमध्यस्थं सुमिष्टं रसं धारयन्ति अंशुविशिष्टा असार-पदार्था एव रसनिर्गमनेनासारांशा अप्रयोजनीया भवन्ति। सुवासदृशरसस्य धारका असारांशा एव। मनोहरं कमलं मलिनजले भासमानं यत्नेन चतुर्दिशः सुवासिताः करोति। तस्यापि धारकं मूलं शिफाश्च। एतान्येव केशराजवर्णाभि जानुदघ्ने पङ्के निमज्जितानि कमलस्य विकाशपथं सुगमं कुर्वन्ति। त्वं विद्धि, प्रकृतेरेतन् निष्ठुरं कर्तव्यमिति, सर्वैरेवावश्यं पालनी-यश्च। जड़ाश्चेतनाश्च पदार्था इमं नियमं परिहर्त्तुं न शक्नुवन्ति। वयं सर्वं एवैकस्मिन् पवित्रमन्दिरे निर्विघ्नं निवसामः। अंशतोऽयमेव मन्दिरमेतत् प्रकाशयति। संसारस्य विपदा वयं न पीड़िताः। त्वया कष्टमनुभूयते, अहर्निशं केशरहितं मस्तकमग्निशिखा सन्तापयति। यदि तव मस्तकोपरि मां नारक्षिष्यस्तर्हि मन्ये, तव दुःखस्यान्तो नाभविष्यत्। कोऽपि इन्धन-विदारणार्थं दारुखण्डरूपोपायोदयदथवा वृष्ट्यातपाभ्यां शरीरं निष्पेषितम-भविष्यत्, अथवा कोऽपि विदार्य्यं रन्धनशालाया उद्धमानमध्ये इन्धनरूपेण प्रज्वाल्य भस्मसादकरिष्यत्। प्रकृते निष्ठुरक्रीड़या त्वत्सदृशानि वृहत्काष्ठा-नि वंशाश्च दावाग्निना दह्यमानाः सन्ति। मनुष्यैरपि जीवने त्वमिन्धनरूपेण व्यवहृियसे। प्रबलझञ्झावातेन उन्मूलिताः प्रकाण्डा वृक्षाः प्रस्तरप्रतिहताः शकलिता भवन्ति, केचन नद्याः पुलिने निमग्ना निश्चिह्ना भवन्ति, केचन वा नदीस्रोतसा नीयमाना आवर्त्ते निमज्जिताः क्षीयमाणा गलिताश्च समुद्रा-भिमुखं गच्छन्ति। एषैव नियतेः कठोरा नीतिः। मित्र, त्वं सुखेन वर्तसे दुःखमयजीवनस्य मध्येनैव संसारस्योत्थानपतनानि हास्यक्रन्दने जन्ममृत्यू-चैतानि विश्व-ऐन्द्रजालिकस्य विचित्रा इन्द्रजालक्रीडाः पश्यन्नसि। जीवन्
Digitized by eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुनः बहूनि दद्ययसि । अधुना यदवस्थायां वर्तसे सैव तव सुखमयं जीवनम् । मम वदने यः स्वल्पः प्रकाशो वर्तते स वह्नेरेव शान्तं रूपम् । यदा स रुद्ररूपं धारयिष्यति तदा पृथिवी विध्वस्ता भविष्यति । प्रदीपवदने यः स्फुलिङ्गो वर्तते स हिरण्यरेता दीपिकाशक्तिः जीवानां प्राणस्वरूपं शान्तं रूपम् । इन्धनस्य स्फुलिङ्ग एव दाहिकाशक्तिः विश्वसंहारकसंहारमूर्त्तिश्च । तैलनिमज्जिते तव कच्छूरे शरीरे कथमपि यदि स्फुलिङ्ग एकः पतति, तदा त्वं भस्मसाद् भविष्यसि । अहमपि कपालखण्डानि भूत्वा भूमौ निपत्य स्थास्यामि । तदा द्वयोरेव जीवनं विफलं भविष्यति । विद्धि त्वम्, पृथिव्यां जड़ाश्चेतनाश्च ये पदार्था वर्तन्ते तेषां प्रकृतावेवोत्पत्तिः स्थितिर्लयश्च भवन्ति । मृत्योरनन्तरं स्वरूपं परित्यज्य रूपान्तरं ग्रहीष्यति । अतोऽस्माभिः जीवनस्य कठोरं कर्तव्यमश्यमेव पालनीयम् । मित्र, विवादं परिहर । विवादेनावयोर्यदि विच्छेदो भवति तर्ह्यु भयोरेव पतनम् अवश्यम्भावि जानीहि । आवयोरैक्येनैव जगत ऐक्यम् । आवयोः शान्तिरेव जगतः शान्तिश्च । आवयोस्त्यागेन यदि जगति शान्तिर्विराजते ज्ञानस्य विस्तृतिर्भवति च तर्हि, अतोऽन्या का सौभाग्यकथा भविष्यति ? यदावां मन्दिरस्य परिधेरुन्मुक्तौ पृथिव्या विशाले वक्षसि व्याप्तौ भविष्यावः, तदैवावयोस्त्यागस्य सफलता जन्मनश्च सार्थकता भविष्यतः ।'

प्रभातप्राया रात्रिः । पूर्वदिशि प्रकाशोन्मेषो दृश्यते । अन्धकारे निमग्ना पृथिवी पुनर्नवीनं जीवनमलभत । निखिलं विश्वं सदानन्दरुपेणैव ज्योतिर्मयमभूत् । क्रमशः प्रदीपोऽपि म्लानोऽभवत् । प्रदीपाधारः प्रदीपश्च निःशब्दावभवताम् । भक्तोऽपि सारगर्भं तत्त्वज्ञानं लब्ध्वा मन्दिरे साष्टाङ्गं प्रणम्य प्रस्थितः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गोमयापसारणपात्रम् (खदा)[१] आतपत्रञ्च (जापिश्च)[२]।

मकरसंक्रान्तेः पूर्वदिनम्। तद्दिने देउराममहन्त३स्तद्भृत्यो गेठुराम४श्च संक्रान्तिमुपलक्ष्य प्राङ्गणस्य तृणादीनि कुद्दालेनापसार्य्य प्राङ्गणं मनोहरं कृतवन्तौ। 'थुलुकौनाम्नी दासी भग्नतलगोमयापसारणपात्रे भग्नवंशासन-खण्डं निधायावर्जनाभिस्तत परिपूर्य्य वास्तुसम्मुखस्य गर्तं ता आवर्ज्जनाः परित्यक्तवती। बालार्कदर्शनादारभ्य मध्याह्नस्य प्राक्कालं यावद् आवर्ज्जना नीयमानायास्तस्या दास्या मध्यदेशेऽभिघातवेदनाया अनुभूतिरभूत्। 'महन्तस्य दृष्टेरगोचरा सा वुलनीगृह५स्य छायायां विश्राम्यति स्म। ततः सा पादयोः शिरासङ्कोचवेदनान्वभवत्। कथमपि मध्यदेशं सरलीकृत्यैकेन हस्तेन संम्मार्ज्जनीमपरहस्तेन गोमयापसारणपात्रञ्च गृहीत्वा ६ चामरगृह-स्यैकस्मिन् पार्श्वे कुड्यस्थितभग्नातपत्रस्य निम्नदेशे तत् पात्रं रचितवती। आतपत्रस्य बहिरावरणद्वयमपि भग्नम्। मध्यस्थाने पत्राणि न सन्त्येव, केवलमातपत्रं प्रत्यासक्त्येव कानिचिदेव पत्राणि तत् संलग्नानि वर्तन्ते। आतपत्रस्य चूड़ापि भग्ना। तस्य ग्रन्थिप्रभृतयोऽपि भङ्गुरा जाताः।

१। 'खदा'—गोमयापसारणपात्रम्।

२। 'जापिः'—वंशस्य मसृणशलाकाभिः 'टकौनामकवृक्षस्य कोमल-पत्रैर्नवैर्निर्मित आतपत्रविशेषः।

३। 'देउरामः' इति नामानुसारेण नाम्नः, 'महन्त' इत्युपाधिश्च।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वर्षाकालानन्तरं व्यवहाराभावाद् आतपत्रं कुड्यसंलग्नमेव वर्त्तते । तत् प्रति कस्यापि दृष्टिरेव नासीत् ।

रात्रिः सञ्जाता । त्रयोदशीचन्द्रः पृथिवीं प्रति क्रमशोऽवतरति स्म । अभ्रहीनं नभः सर्वं कुज्झटिकाच्छन्नमभूत् । होमगृहस्य काष्ठानि बालका अपहरिष्यन्तीति विचिन्त्य महन्तो गृहप्रवेशद्वारं सुदृढम् अर्गला-बद्धमकरोत् । प्राङ्गणस्य द्वारगृहेऽग्निं प्रज्वाल्य महन्तो गेठुरामश्च सार्द्धप्रहररात्रिपर्य्यन्तं सावधानं स्थितवन्तौ । कुत्रापि कोऽपि नास्ति । चौरस्यागमनसूचनापि न विद्यते, तावपि तन्द्राभिभूतौ । एतत् सर्वं दृष्ट्वाग्निं सङ्कुचितं कृतवन्तौ । 'वुलनि'गृहस्य खट्वायां महन्तो वंशनिर्मितमञ्चोपरि वंशासनं प्रसार्य्य तद्भृत्यो गेठुरामश्च द्वावेव नीशारावृतौ सङ्कुचितगात्रावशयाताम् । प्रबलं शीतं, तदुपरि शीतकम्प-कारको वायुः, महन्तस्य तन्द्रा समायाता । वायुनातपत्रम् ईषत् सञ्चा-लितम् । काष्ठापहारका बालकाः समागता इति मत्वा महन्तः प्रबुद्धो बहिरागच्छत् । चतुर्दिक्षु परिभ्रम्य कुत्रापि कमपि न दृष्टवान् । महन्तः शय्यायां निद्रित इव निस्तब्धः स्थितवान् । ततः स दत्तकर्णः शृणोति यद् आतपत्रं गोमयापसारणपात्रं सम्बोध्य कथयति—'भो दुर्गन्धवति, त्वया मरणस्थानं कुत्रापि न लब्धम् । तव गोमयलिप्तस्य शरीरस्य पूतिगन्धेन समग्रा निशा मया विनिद्रमतिवाहिता । ससम्मानम् अस्मात्

४। 'गेठुरामः' इति कस्यचिद् भृत्यस्य नाम ।

५। 'वुलनिगृहम्'—गृहाद् गृहान्तरगमनाय निर्मितो दीर्घाकारो गृहविशेषः ।

६। 'चामरगृहम्'—गृहविशेषस्य नाम ।

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्थानात् त्वं शीघ्रमपसर । काककीड़ास्थानं, दूर्गन्धजलयुक्तपङ्कमयस्थानं गोष्ठगृहञ्च तव आश्रयस्थानानि । दास्याःपुत्री 'थुलुकी'दासी वा कीदृशी ? सातीव दुष्टा, किमपि सम्यङ् नानुभवति । तया तव रक्षणस्थानं मदीयमृतप्रायशरीरस्य समीप एव लब्धम् । समग्रकुबुद्धे मूलं गृहधूमसदृशी कृष्णकाया दासी 'थुलुकी' हि । दुरादेव तस्याः दर्शनेन वमनं भवति । कण्टकमयवंशमूलमिव तस्या मस्तकं जटिलम् । केशाश्च रुक्षाः । मस्तकं तैलहीनम् , प्रसाधन्या सह सम्बन्ध एव नास्ति । अत एव हि गोपालका बालकास्ताम् उपहसन्ति यत्, थुलुवया दारया मस्तके 'कपोतनीड़म्' । तस्याः शरीरमपवित्रम् । स्यूतं वस्त्रमेव तस्याः स्नानवासः । मलिनं वस्त्रद्वयं शीते ग्रीष्मे च गात्रसंलग्नं वर्तते । कुरूपायास्तस्याः शरीरं महत्तस्य पत्न्याः कूर्परावातैर्मुष्टिप्रहारैर्मुखे मुष्टिताड़नेन पुरातनसम्मार्ज्जन्या आघातैश्च जर्जरितं भवति । तथापि तस्या लज्जालेशोऽपि नास्ति । वास्तुस्थानस्य विगलितानि वस्तूनि, आवर्ज्जनाः, क्षुद्रबालकानां बालिकानाञ्च पुरीषाणि गोष्ठस्य गोमयानि च वहन्त्या वक्रमव्यायास्तस्याः कालो गच्छति । गृहप्राङ्गणानि गोष्ठगृहाणि च परिष्कृत्य समग्रधूलिकणान् मम मस्तकोपरि रक्षति, अपरिष्कृतस्थानानि परिष्कृत्य सम्मार्ज्जनीमपि मम केशरहिते मस्तके स्थापयति । आसन्नमरणा एताः प्रति यमस्यापि विस्मृतिर्जाता । मम मरणेनैव हि दास्याःपुत्र्यास्तस्या हृदयं शीतलं भविष्यति । एतदुक्त्वातपत्रं गोमयापसारणपात्रमाह—'प्रभात एव त्वामस्मात् स्थानाद् यथापसरति तदर्थं 'थुलुकीदासीं वद । गोमयापसारणपात्रं बहु समयं यावन् निःशब्दं कण्टकमयवचनजातम् अशृणोत् । ततो गात्रप्रसारणपूर्वकमाह —'भगिनि, उन्मत्तवं कारणं विना त्वं यथा तथा

Funding by IKS-MoE

CC-0. Agamnigam Digitization Foundation, Chandigarh.

प्रलपितवती। कतिपयैर्मासैरहं त्वत्तो ज्यायसी। त्वं ज्येष्ठाभगिनीति सम्बोधयितुमपि लज्जसे, वचनेऽपि त्वं दरिद्रासि। कारणं विनैव कथं 'थुलुकीदासीं भृशं विकत्थसे? वेणुषु 'जाति' नामको वेणुरेव श्रेष्ठः। आवां तद्वंशसम्भूत एव। एकस्यैव वंशस्यार्द्धभागस्य त्वमर्द्धभागस्य चाहम्। महन्तवापुः गृहकार्य्येषु व्यवहारार्थं द्व एव पृथगूरुपेण निर्माति स्म। वंशखण्डानां मसृणाः शलाकाः कृत्वा ताभिरातपत्रं निर्माय मस्तके गृहीत्वा यथाभिमतं स्थानं गच्छति। स्थूलशलाकाभिर्मां निर्माय गृहस्य कुत्सित- कर्माणि मया कारयति। एतदेवावयोर्मध्ये पार्थक्यम्। आवाम् एकस्यैव गृहपतेः समीपे बहुकालं व्याप्य सुखेन तिष्ठावः। कदापि त्वया सह मम कलहलेशमात्रमपि न जातम्। अद्य तव कथं मतिभ्रमो जातः। त्वं मां यदुपहससि एतन्न शोभनं मन्ये।' आतपत्रं गोमयपात्रं सम्बोध्याह—'हे कर्कशि! विमृश्य वद। आवामेकस्यैव वंशस्य भवितुमर्हावः, द्वयोरेव नु कर्माणि आचारा नीतयश्च विभिन्नाः। त्वं समग्रं दिनं व्याप्यापवित्रकर्माणि करोषि, अहं सज्जनानां मस्तकोपरि स्थित्वा परिभ्रमामि, कर्षकान् गोपालकांश्च बृष्ट्यातपनिवारणेन परिरक्षामि। पश्य, मनोहरवेशेन सुसज्जितं कृत्वा मां कीदृशं रक्षति! मम शरीरे वंशस्य मसृणशलाकाभिर्निर्मितान्यङ्गुरीयकसदृशानि, अङ्गुलिप्रवेशक्षमाणि कीदृशानि रन्ध्राणि वर्तन्ते। मम मुकुटोपरि पुष्पखचितचूड़ा, आवरणद्वयमध्ये 'टकौ'* नामकवृक्षस्य कोमलपत्राणि, गात्रस्य चतुःप्रान्तेषु अभ्रनिर्मितकुसुमानि रक्तवस्त्रस्य वर्तुलाकारचक्राणि

* टकौ इति कस्यचिद्वृक्षविशेषस्य नाम। अस्य कोमलपत्रैरातपत्रं निर्मीयते जनैः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

च वर्त्तन्ते । मयनाभिरामां मां यत्नेन रचति । गुणैर्मत्समा भवितुं कथं वाञ्छसि ? क्व स्वर्गतारका क्व वनजाततारका च ' गोमयपात्रम् आतपत्रं सम्बोध्याह—भगिनि, तवाहङ्कारसूचकानि वचनानि श्रुत्वा मम चिरात्कर्णपीड़ा सञ्जाता । त्वं गर्वेण स्फीतासि वयसो भागत्रयं विगतम् । एक एव भागोऽवशिष्टः, मृत्युकाले तव बुद्धि-भ्रमो जातः यौवनकाले 'मण्डलगृहस्य'* वेणुनिर्मितोच्चमञ्चोपरि, अलीक-क्षमतागर्वेणोत्फुल्लासीः । महतां जनानां शीर्षोपरि वृथाड़म्बरेण भ्रान्त्वा नानाघातैः कष्टमलभथाः, निरन्तरं वृष्ट्या सिक्तासीः, करकाघातेनास्थीनि ते विचूर्णितानि । सगर्वं सञ्चरन्त्यास्तव कदाचित् पवनवेगेन जनमस्तकाद् गर्त्तापातनेन, कदाचिद् वा क्षेत्रेऽधोमुखपातनाच्च नाना यन्त्रणा जाताः । त्वम-तीतस्य कालस्यात्याचारकथा विचिन्तय । 'अपरस्य दोषदर्शनेन स्वस्यैव हानिर्भवति' । हस्तत्रयपरिमितदूरे तव निम्नस्थाने स्थिताया मम कुड्यसंलग्न-देहस्य दुर्गन्धेन तव कबन्धस्य रात्रौ निद्रा नायाता । परिचिन्तय त्वं साहङ्कारं मार्गेण गच्छतस्तव शरीरे खेचराः पक्षिणः पुरीषादिकं विमुञ्चन्ति स्म । कदाचिन् 'महन्तवापु'स्तवापवित्रं शरीरं प्राक्षालयत् किम् ? 'महन्तवापोः समग्रवास्तुस्थानस्य सर्वासाम् आवर्ज्जनानां दूरीकरणेन गृहं पवित्रीकृत्य रोगादेरहमेव परिरक्षामि । तव शरीरमतीव दुर्गन्धयुक्तम् । अद्याहं मरण-वेलायामपवित्रास्मि, त्वमसि च पवित्रा ! वदन्ति च जना यद् 'आत्मदोषं न पश्यन्ति परच्छिद्रं पदे पदे' ।

त्वं बिद्धि, मनुष्यो मनुष्यस्य सेवकः । तत्रोच्चनीचभेदो नास्ति । समाज-व्यवस्थाया रक्षणार्थं मनुष्याणां मध्ये ऽधिकारपदव्यो वर्तन्ते । कार्यस्य गुरुत्वा-

* 'मण्डलगृहम्'—यत्र सप्तस्त्रीणां समाजो भवति ।

Digitized by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नुसारेण च पदवीनां श्रेणीविभागोऽस्ति वेतनस्यापि तारतम्यं भवति च। यदैव वेतनभोगी भवति तदैव मर्य्यादाया अनुपातेन प्रभुभृत्ययोः सम्बन्धो भवति च। अस्माकं जीवनं न स्वतन्त्रम्। आवां जड़वस्तुनी। आवयो र्नास्ति चेतना वेतनमपि च नास्ति। आहारविहारावपि न स्तः। वर्तते चापव्यवहारः। नराः स्वकीयसुविधार्थं जड़वस्तुभ्यो यानि वस्तूनि निर्मान्ति तानि नराणां सेवका भृत्या वा। आवां 'महन्तवापोः' सेवकौ भृत्यौ वा। त्वमुच्चकक्षाया अहन्तु निम्नकक्षायाः। भृत्येन भृत्यस्य कदापि निन्दा न कर्तव्या, अपमानो वा न करणीयः। वर्त्तमानसमये द्वयोरेव जरावस्था संजाता, आवां व्यवहारानुपयोगिनी च। अकर्मण्यवस्तून्यज्ञातभावेन पृथिव्या विशाले वक्षसि विलीनानि भवन्ति। अस्माकं दुःखस्य कातरा प्रार्थना दीर्घनिःश्वासा अप्रकाशितवेदनाबुद्बुदाः स्वकीयहृदि उत्थाय हृद्येव लीयन्ते कस्य समीपे वदामि, को वा विश्वसिष्यति। जीवनेऽनुभूतिर्यतो नास्ति प्रकाशस्य स्थानमपि न विद्यते च। स्नेहलाभाशा तु वृथैव। महा-कालस्य कठोरव्यवहारेण परिणते वयसि प्रकृतेर्वस्तूनां मरणशय्या भूमौ विलीना भविष्यन्ति॥

——o——

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

Funding by IKS-MoE